॥ रामः ॥ ॥ अथगुरुवाशिष्टवैराग्यबोधारंभः ॥ ॥

ग॰वि॰८ ननु विशेषणविशेष्योभयपर्याप्तप्रतियोगिताकत्वं तद्विशिष्टप्रतियोगिकत्वं तादृशो॥भयपर्याप्तानुयोगिताकत्वं त द्विशिष्टानुयोगिकत्वं

श्रीगणेशायनमः॥ अविघ्नमस्तु॥ तद्धर्मनिर्विकल्पकानंतरं तद्विशिष्टवैशि

१ ष्ट्यबोधानुदयात्तत्तद्धर्मप्रकारकंज्ञानंकारणं विशिष्टवैशिष्ट्यबोधस्य विशिष्ट

प्रतियोगिकवैशिष्ट्यबोधो विशिष्टानुयोगिकवैशिष्ट्यबोधश्चेत्युभयथाकारणताव

च्छेदकत्वमेवकारणादौ विशेषणत्वं तथा प्रतियोगित्वानुयोगित्वयोरवच्छेदकत्वमेवप्र

तियोग्यनुयोगिनोर्विशेषणत्वमिति तदवच्छिन्नप्रतियोगिताकत्वमेव तद्विशि

ष्टप्रतियोगिकत्वं तदवच्छिन्नानुयोगिताकत्वमेव तद्विशिष्टानुयोगिकत्वं॥ भूतला

क दि द्यनुयोगिकदंडविशिष्टपुरुषवैशिष्ट्यप्रतियोगितायां दंडादिविशिष्टपुरुषादि

निष्ठकुंडलादिवैशिष्ट्यानुयोगितायां च दंडाद्यवच्छिन्नत्वं दंडाद्यंतर्भावेन तत्तत्स

र्याप्तिसंभवात्॥ तयोर्दंडादिविशिष्टत्वेन भूतलपुरुषादौ पुरुषकुंडला राम

दिरिव भूतले दंडादौ दंडकुंडलादौ वैशिष्ट्यधीत्वप्रसंगात् ॥ तत्र तदभावासत्वप्रसंगाच्च ॥
वैशिष्ट्यप्रतियोगित्वानुयोगित्वयोरवच्छेदकत्वे च तद्वैशिष्ट्यसमयावच्छेदेन
तद्व्यक्तिसत्वं तत्र विभिन्नकालावच्छिन्नव्यक्तिकयोरवच्छेद्यावच्छेदकभावविरहात् ॥
तद्वैशिष्ट्यप्रतियोगित्वयोश्च वैशिष्ट्यप्रतियोस्वरूपानतिरिक्ततया तद्वैशिष्ट्यावच्छेद
ककालावच्छेदेनावर्तमानस्य तत्प्रतियोगित्वानुयोगित्वसमानकालावच्छिन्नत्वासं
संभवेन तदवच्छेदकत्वासंभवात् ॥ अतो यदा भूतले पुरुषवैशिष्ट्यं तदन्यकाल एव पुरु
न षे दंडवैशिष्ट्यं तत्र भूतले दंडविशिष्टपुरुषवैशिष्ट्यं अपि तु दंडोपलक्षिततत
द्वैशिष्ट्यमेव एवं यत्राविभिन्नसमयावच्छेदेन पुरुषे दंडकुंडलयोर्वैशिष्ट्यं तत्र न
एकविशिष्टानुयोगिकमपरवैशिष्ट्यमपि त्वेकोपलक्षितानुयोगिकमेव अ॥त

ऐवंपक्षतावच्छेदकविशिष्टेसाध्यवैशिष्ट्यंगंधप्रागभावकालीनघटोगंधवान्पृ
२ तौ थिवीत्वादित्यत्रानुमितिर्नावगाहते ॥ अपितुसामानाधिकरण्यमात्रंसाध्यस्येत्युपा
ध्यायाः एवंतद्धर्मसामानाधिकरण्यस्यसामानाधिकरण्यसंबंधेनतद्धर्मस्यचवैशि न
ष्ट्यप्रतियोगितावच्छेदकत्वेवैशिष्ट्यानुयोगिनस्तादृशसामानाधिकरण्यनिरूपका
न्य धिकरणत्वंतंत्रं अतः गुणत्वसामानाधिकरण्येनसामानाधिकरण्यसंबंधेनगु
णान्यत्वेनवाविशिष्टस्यसत्त्वादेः गुणादौनवैशिष्ट्यं ॥ नचैवंतत्तत्कालादिदेशस्य प
टादिसमयवृत्तित्वविशिष्टघटाद्यधिकरणत्वानुपपत्तिरितिवाच्यं ॥ तत्संबंधघटित
सामानाधिकरण्यादेस्तत्संबंधप्रतियोगितावच्छेदकत्वएवउक्तस्यनियामकत्वा
त्कालिकसंबंधेनमहाकालान्यत्ववृत्तित्वविशिष्टघटादेस्तेनसंबंधेनवैशिष्ट्यं राम
महाकालेनापेयतेएवंचमहाकालोघटवान्कालपरिमाणादित्यादौप्रतियोगि

तावच्छेदकविशिष्टप्रतियोगिव्यधिकरणाप्रसिध्द्याशंकादीधितिकृतो कथंचिदुपपाद
नीया। दृष्टं चैवं वैशिष्ट्यप्रतियोगितानुयोगितावच्छेदकप्रकारकज्ञानयोर्विशिष्टवैशिष्ट्यप्र
त्ययहेतुत्वपर्यवसानात् विशेषणतावच्छेदकविशेष्यतावच्छेदकप्रकारकज्ञानं तद्धेतु
रिति प्रवादः वैशिष्ट्यप्रतियोगिकत्वादेरेव विशेषणत्वादिपदार्थत्वात्। वैशिष्ट्यांशे विशि
ष्टनिरूपितत्वविशिष्टानुयोगिकत्वावगाहिबुद्धावेव विशेषणतानुयोगितावच्छेदक
ता। प्रकारकज्ञानं हेतुः न तु वास्तवविशिष्टनिरूपितविशिष्टानुयोगिकवैशिष्ट्यबुद्धौ तेन
तत्तद्दण्डादिप्रतियोगिकस्य तदनुयोगिकस्य च संयोगसमवायादिरूपवैशिष्ट्यस्य निर्वि
लस्यैव दण्डत्वादिविशिष्टनिरूपितत्वेऽपि दण्डत्वादिनिर्विकल्पकानन्तरं विशेष्यविशे
षणतत्रापि विशेषणान्तरमिति रीत्या एकत्र द्वयमिति रीत्या च दण्डी पुरुष इत्यादि
प्रत्ययस्य नानुपपत्तिः पीतः शंखो नास्तीत्यादिबुद्धेः शंखत्वावच्छिन्नप्रतियोगिताशे

३ पीतत्वावच्छिन्नभ्रमात्मकवास्तवपीतत्वादिविशिष्टनिरूपितविशेष्यता[redacted]नवगा
हितेपि न पीतत्वनिर्विकल्पकानं॰ तदसमापत्तिः॥ अथ सौंदलोपाध्यायमतेत्रशशीयत
याश्रृंगं नास्ति समवायितया वाच्यं त्वं नास्ती॰ व्याख्याकारिकायां व्यधिकरणधर्माव
च्छिन्नाभावबुद्धेः शशीयत्वसमवायित्वावच्छिन्नप्रतियोगिताकत्वरूपतद्धर्मविशिष्ट
निरूपितत्वावगाहितया तत्तद्धर्मप्रकारेण शृंगवाच्यत्वादिरूपविशेषणज्ञानं विना
तादृशबुध्यनुदयप्रसं[redacted]गः॥ न च शृंगं शशीयं वाच्यं त्वं समवायीति भ्रमानंतरमेव
तादृशाभावबुध्यभ्युपगमान्न दोष इति वाच्यं शृंगं शशीयं न वा वाच्यं त्वं समवायीति वि न
शेषदर्शनदशायामपि तादृशप्रतीतेरानुभाविकत्वात्तदपलापे सर्वत्रैव तदप— गाम
पलापप्रसंगात् सौंदलोपाध्यायमतस्यात्यंतानिर्युक्तिकतापत्तेः तादृशविशेषव ३

र्शनकालीनतद्बुद्धेः शंखवान्नेत्यत्र देशान्तरीयत्वसमवायित्वाभावाव॥ग्राहिता
स्वीकारे सर्वत्रैव तत्संभवेन तद्दोषतदवस्थ्यादितिचेत्सत्यं॥ उक्तएव दोषस्तन्मतपरि
त्यागबीजं॥ दीधितिकृतापि तद्विशिष्टज्ञानस्याभावधीहेतुत्वादित्यनेन विशेषण
तावच्छेदकप्रकारकविशेष्यज्ञानरूपकारणबाधप्रदर्शनपरतैव व्याख्यातं अस्यच
दोषस्य विशेषदर्शनदशायांशे आहार्यविशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्यसं
भवात्तद्बलादेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतीतेः संभवती
ति न चानाहार्यमेव विशेषणतावच्छेदकप्रकारकज्ञानं विशिष्टवैशिष्ट्यप्रत्ययहेतुर्गौर
वात् अतएव शंखेवानपीतइत्यादि विशेषदर्शनवतापि प्रकारेण पीतः शंखो नास्ती त्र
किंतु द्वीपान्तरे इत्यादिवाक्यं प्रयुज्यते न ह्यवाक्यार्थमज्ञात्वा तस्य वाक्यरचना संभवति

४ येनपीतंशंखोनास्तीत्याद्याकारकविशिष्टवैशिष्ट्यबोधमंतरेणापि विशेषदर्शनवता
तादृशंवाक्यंप्रयोक्तव्यं।।यदिच्चानाहार्यमेव विशेषणतावच्छेदकप्रकारकज्ञानं विशि
ष्टवैशिष्ट्यप्रत्ययहेतुः।।अन्यथादंडोरक्तइत्याद्याकारकाहार्यनिश्चयानंतरं रक्तार
क्तदंडोनास्तीत्याद्याकारकस्यविशेषणतावच्छेदकांशेसंशयात्मकस्यापि विशि
ष्टवैशिष्ट्यबोधस्यापत्तेः।विशिष्टवाक्यार्थमंतरेणापि तत्प्रकारकतद्विशेष्यकज्ञान
त्वादिनावाक्यार्थज्ञानंज्ञात्वापरकीयतादृशज्ञानेच्छयावाक्यप्रयोगः संभवतीति तेन
प्रतारकस्यपीतःशंखोनास्तीतिप्रतीतिरावश्यकीतिमन्यतेतदपिनसंगतिः।।वैशिष्ट्य
प्रतियोगित्वंहि विशेषणतावच्छेदकविशेषितमवच्छिन्नत्वंयत्रविशेषणसंसर्गघट
कतयाभासतेतत्रैवविशेषणतावच्छेदकप्रकारकज्ञानेपिसंशयास्वावच्छिन्नप्रतियो रा

गिताकानुयोगिकत्वसंबंधेनाभावांशे शशीयत्वादिप्रकारकस्य शशीयतया शृंगं ना
स्तीत्याकारकव्यधिकरणधर्मावछिन्नप्रतियोगिताकाभावप्रत्ययस्योक्तविशेषदर्शि
नदशायां निष्प्रत्यूहत्वात् दंडी चैत्रः घटो नास्तीत्यादि विशिष्टवैशिष्ट्यबोधे तु दंडत्व
घटत्वावछिन्नप्रतियोगिताकत्वविशिष्ट एव संयोगानुयोगित्वादिसंबंध इति तत्र
दंडत्वघटत्वज्ञानापेक्षायामपिवत् तत्र शुद्ध एव संयोगानुयोगित्वप्रतियोगित्वादिश्चैत्रा
भावादौ दंडघटा[illegible]देः संसर्गः दंडत्वघटत्वादेस्तु स्वावछिन्नप्रतियोगिताकसंयो
९ गः तथाविधानुयोगित्वादिकं तत्र तथा तदा स्वावछिन्नप्रतियोगिताकत्वविशिष्टसं
सर्गावछिन्नायविशेषणपारतंत्र्येण विशेष्यनिरूपिततत्धर्मप्रकारकैतातत्कालिबु
द्धावेव विशेषता[illegible]ताछवच्छेदकप्रकारकज्ञानस्य कारणता कल्पनीया॥ शशीयतया
शृंगं नास्तीत्यादौ चाभावांशे तादृशसंबंधेन शशीयत्वादेः स्वातंत्र्येणैव प्रकारतान

५ तुविशेषणीभूतप्रसंगादिपारतंत्र्येणतस्यप्रसंगादाव विशेषणत्वात् तन्निरूपितप्र
कारतावच्छिन्नः प्रकारतायाएवतत्पारतंत्र्येणप्रकारतापदार्थत्वादित्युद्धरणाकार
माकलय्याबाधप्रत्ययेप्रतियोगिविशेषितापन्नस्यैव धर्मस्य प्रतियोगितावच्छेदकतया
भानमनुभवसिद्धमित्युक्ताप्रतियोग्यवृत्ति धर्मस्य प्रतियोगितावच्छेदकत्वं निराक
नं चै तं। एवमपिव्यधिकरणधर्मावच्छिन्नस्यैवप्रतियोगिनोव्यधिकरणधर्मावच्छिन्ना
भावप्रतीत्याविषयीकारणे उक्तकारणबाधरूपबाधकस्यजागरूकतयाअप्रा
च्यं वगाहतइत्याशंकायाअनुधावतिनितिवा भ्रमात्मकविशेषणतावच्छेदकप्रकारक
ज्ञानादिवव्यधिकरणधर्मावच्छिन्नाभावप्रतीतिरुत्पद्यते विशेषदर्शनकालीनंशाब्दी
यत्तयोप्रसंगंनास्तीत्याकारकंज्ञानंप्रसंगादौशब्दीयत्वाद्यभावविषयकमेवयत्रबाधकंत
त्रैवप्रतीतेरन्यविषयकतानुबंधकत्वविरहस्थलेपि अन्यथायत्रयत्किंचिदवयव राम

५

नात्रात्मकाघटनाशोनैय्यायिकादिसंमतस्तत्तैर्स्याएव अयंघटइत्यादिप्रत्यभिज्ञाया
स्तज्जातीयावलंबनत्वमावश्यकमितिसर्वत्रैवतदवलंबनतासंभवात् भेदावगा 5
हिप्रत्यभिज्ञायाःऽसिद्धास्थैर्यमात्रोच्छेदमनंगमादित्याशयेनतादृशाशांकासंभवा
यदि ४ नू॥अथवैशिष्ट्यांशेतद्धर्मावच्छिन्नप्रतियोगिताकत्वस्यैवाधितेतद्धर्मावच्छिन्न ४वगाहि
प्रकारकंज्ञानंहेतुःतदाघटत्वादिनिर्विकल्पकानंतरंघटत्वावच्छिन्नप्रतियोगिताक न्येव४
त्वानवगाहिघटोनास्तीत्याकारकाभावप्रत्ययःकथंनोत्पद्यतेनव्यमतेऽभावबुद्धौप्रति
योगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्यपृथक्कारणताविरहादितिचेन्नतद्ध
र्मविशिष्टनिरूपितत्वेनवैशिष्ट्यानवगाहिनस्तद्धर्मविशेषितप्रतियोगिप्रकारका
भावभानस्यकुत्रचिदप्यनभ्युपगमेनापाद्याप्रसिद्धेःएतेनघटत्वावच्छिन्नप्रतियोगि
ताकाभावेद्रव्यत्वादिविशिष्टवैशिष्ट्यस्यासत्वेपिकेवलंविशेष्येविशेषणमित्यादिरी

स्याद्रव्यत्वादिविशेषितिघटत्वादिप्रकारकताद्दशज्ञानापत्तेर्दुर्वारतयाघटादिमत्त्वेद्र
९ य व्यांतरवत्यपिद्रव्यंनास्तीत्याकारकप्रत्ययापत्तिरितिपरास्ते॥अयंसौंदलोपाध्या
यमतेपटत्वेन घटोनास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धेर्घटत्वविशिष्टवैशि
ष्ट्यानवगाहित्तयाघटत्वादिप्रकारकज्ञानजन्यतावच्छेदकानाक्रांततयाघटत्वादि
निर्विकल्पकोत्तरंताद्दशबुध्यापत्तिः॥अत्रकेचित्पटत्वादिनाघटादेस्ताभावस्य
माना प्रतियोगितायाव्यधिकरणतयापटत्वादेरिवसमवायाधिकरणतयाघटत्वादेरप्य
वच्छेदकत्वस्वीक्रियतेइतिताद्दशबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहित्वमस्तमे
वपटत्वाद्यवच्छिन्नत्वेनैवतत्रभानोपगमादितिनातिप्रसंगः॥प्रतियोगितावच्छे
दकत्वंचउभयत्रव्यासज्यवृत्तिः।अतःप्रतियोगितावच्छेदकघटत्वावच्छिन्नवति
नताद्दशाभावासत्वप्रसंगःप्रतियोगितावच्छेदकपर्य्याप्त्यधिकरणसमुदायाव राम
नै१ च्छिन्नैवतस्यममभावस्यविरोधोवैयामहानसीयवन्हित्वाद्यवच्छिन्नाभाव

स्यवह्नित्वाद्यवच्छिन्नाधिकरणाय[illegible]दवस्तत्वप्रसंगात्॥ एतेन समाना
धिकरणतया घटत्वादेस्ताद्दशाभावप्रतियोगितावच्छेदकत्वे घटत्वादिना घटादि
सत्वोपलंभस्य ताद्दशाभावबुद्धिविरोधित्वप्रसंगइत्यपि परास्तं॥ प्रतियोगिताव
च्छेदकतापर्य्याप्त्यधिकरणप्रकारेण प्रतियोगिमत्वोपलंभस्यैवाभावबुद्धिप्रतिबं
धकत्वात् अन्यथा शुद्धवह्नित्वादिप्रकारेण वह्न्यादिप्रकारकोपलंभस्यापि महा
नसीयवह्नित्वावच्छिन्नाभावधीविरोधितापत्तेः विरोधी च शत्रीयतया शृंगी
नास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धेः शत्रीयत्वशृंगत्वादिसमु
दायप्रकारक शत्रशृंगवा[illegible]नयमित्याकारको शत्रीयत्वावच्छिन्नत्वभ्रमा
त्मकप्रतियोग्युपलंभ एव तन्मते च प्रतिबध्यतावच्छेदकं न वास्तव शत्रीयत्वशृं
गत्वपर्य्याप्तप्रतियोगितावच्छेदकताकाभावविशिष्टबुद्धित्वं शृंगत्वाद्यवच्छि

त्व

ऽप्रतियोगितायां ज्ञानीयत्वावच्छिन्नत्वा[redacted]मात्मकत्वात्रा शृंगं नास्तीति प्रत्ययासंभ
वात् किंतु प्रतियोगितायां ज्ञानीयत्वशृंगत्वाद्यव[redacted]गाह्यभावविशिष्टबुद्धित्वमे छिन्न- त्वाद्यव
व एवं च सर्ववादिसिद्ध[redacted]प्रतिबध्यप्रतिबंधकभावेनैवोपपत्तिः॥ [redacted]शृं
गत्वेन शृंगोपलंभस्य प्रतिबध्यतावच्छेदकं य[redacted]दि प्रतियोगितायां शृंगत्वाद्यवच्छि
न्नत्वानवगाहिबुद्धित्वं तदा शृंगवानयमिति ज्ञानस्य ज्ञानीयतया शृंगं नास्तीति
बुद्धिविरोधित्वं दुर्वारमेव॥ यदि च तदंशे शृंगत्वान्यधर्मावच्छिन्नत्वानवगाहित्वं
[redacted]शृंगं नास्ति ज्ञानीयं च नास्तीति समूहालंबनबुद्धौ तदविरो[redacted]धित्वप्रसं
ग इति चेन्न॥ शृंगत्वाद्यवच्छिन्नत्वनिष्ठावच्छेदकताभि[redacted]न्नाया ऽवच्छिन्नत्व
क निष्ठावच्छेदकता तदा निरूपितप्रतियोगितानिष्ठसांसर्गिकविषयतायाः प्रति राम
बध्यतावच्छेदकघटकत्वेनानुपपत्त्यभावात्॥ उक्तसमूहालंबनज्ञानीयशृं

गत्वाद्यवच्छिन्नप्रतियोगितानिष्ठसंसर्गतायाः आत्रीयत्वाद्यवच्छिन्नसंसर्ग
त तातोभिन्नोऽयत्रात्रीयत्वावच्छिन्नसंसर्गकेदृशज्ञानसंग्रहात् ॥ नन्वत्रात्री ता
यतयाघटंगं नास्तीत्यादिबुद्धौ आत्रीयत्वप्रकारतानिरूपि तद्वृत्तिपरंपरासंस
र्गनिष्ठसंसर्गतांतःपातिनीयाप्रतियोगित्वीयसंसर्गतातौऽन्यैवघटंगप्रकारतानिरू
न्ते पितावच्छिन्नत्वीयसंसर्गतांतःपातिप्रतियोगित्वीयसंसर्गतायाश्चात्रीयत्वावच्छि
न्नत्वानवच्छिन्नैवेति कथं व्यधिकरणधर्मावच्छिन्नाभावबुद्धेः घटंगत्वेन घटोगप
लंभप्रतिबध्यतेतिवाच्यं ॥ तादृशबुद्धौ घटंगप्रकारतानिरूपितसंसर्गतांतःपा
तिप्रतियोगित्वीयसंसर्गतायां आत्रीयत्वप्रकारतानिरूपितावच्छिन्नत्वीयसंसर्ग
ताख्यविषयतानिरूपितत्वस्वीकारात् ॥ तस्या एवोपदर्शितपरंपरासंबंधेना

८ भावांशेवाच्छीयत्वादिप्रकारतानिर्वाहकप्रतियोगित्वादिसंसर्गताभेदेमानाभावात्॥
एवंप्रयुद्धमणित्वाद्यवच्छिन्नाभावस्यैवदाहादिहेतुतयामण्यादिसमवधानका
लेव्यधिकरणधर्मावच्छिन्नतदभावत्वाबलादाहाद्यापत्तिरपिपरास्तेतिवदं
ति॥ प्रयत्नु॥ तद्धर्मप्रकारतानिरूपितविशेष्यतापन्नंदंडादिनिष्ठप्रकारतानि
रूपितविशिष्टप्रकारताकत्वावच्छिन्नबुद्धावेवतद्धर्मप्रकारकज्ञानंहेतुः॥न
नुतदवच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गकत्वमपिकार्यतावच्छेदककोटौ
निवेश्यते॥ दंडत्वादिनिर्विकल्पकानंतरंच दंड इत्याकारकज्ञानंप्रथमतउत्पद्य
ते विशेष्यविशेषणभितिरीत्याऽपिदंडी इत्याकारकज्ञानंतदनंतरमेवस्यालोका
पत्तिरपीष्यतीतिविरहात्॥ तादृशविशेष्यतानिष्ठात्विंच। अतोनदंडत्वनिर्वि
कल्पकद्रव्यत्वादिप्रकारकज्ञानानंतरोत्पन्नद्रव्यवान्दंडवत्याकारकत्ताह राम ८
प्रज्ञात्मानिष्ठप्रकारताशालित्वंतु याऽवच्छिन्नाभिन्नायाप्रकारता २
तादृशविशेष्यत २

शा विशेष्यतासमानाधिकरणप्रकारताशालिसमूहालंबनेव्यभिचार इति ॥ त
तु घं घटमानयेतिवाक्यात्कर्मत्वं घटीयमित्याकारकावांतरवाक्यार्थज्ञानं विना ऽ
पि विशिष्टघटकर्मत्वादिसकलपदार्थविषयकसमूहालंबनोपस्थितिब
लाद्विशेष्यविशेषणमितिरीत्या घटादिप्रकारतानिरूपितविशेष्यत्वावच्छिन्नक
र्मत्वादिप्रकारताशालिशाब्दबोधस्य सर्ववादिसिद्धस्यानुपपत्तेः ॥ तत्र कर्मत्वा स
दिप्रकारतायाः घटादिप्रकारतानिरूपितविशेष्यतानवच्छिन्नत्वे च कर्मत्वं घटी
यमानयने सकर्मकमित्यादिसमूहालंबनात्तादृशज्ञानस्य वैचित्र्यानुपपत्तेः
नहि विशेष्यविशेषणमितिरीत्या बोधः समूहालंबनाद्विलक्षण एवेति वाच्यं ॥ तथा
सति तादृशबोधे एकवाक्यतानुपपत्तेः ॥ व्याप्तिघटकपदार्थानां विशिष्टतस
मूहालंबनोपस्थितिमूलकविशेष्ये विशेषणमितिरीत्या परामर्शादनुमित्युत्पत्तेः ०

मिश्राद्दिसंमतायाअनुपपत्तेः॥एवंदीधितिकृतांताद्दृशारीत्याजायमानायाःकांचन
मयवह्निमाचपर्वतइत्येताद्दृशानुमितेर्विरोधितयाकांचनमयत्वावच्छिन्नवन्हय
भावस्यबाधस्यहेत्वाभासत्वस्यसमर्थनकाले वैशिष्ट्यवन्मत्यप्रतिबध्यत्वपक्षत्वाभिधाना
संगतेः॥परेतु॥तद्धर्मविशिष्टप्रकारकबुद्धाविवतद्धर्मप्रकारकज्ञानंहेतुःतद्वि
शिष्टप्रकारकत्वंचतदवच्छिन्नप्रकारकत्वं॥नतुतदवच्छिन्नप्रतियोगिकत्ववि
शिष्टसंसर्गकत्वमपिकार्यतावच्छेदककोटौनिवेश्यते॥तद्विशिष्टनिरूपितवैशि
स्य ष्ट्यावगाहिज्ञानेतद्धर्मप्रकारतावच्छेदकत्वनियमात्तत्रनियमतःतद्धर्मप्रकारक
ज्ञानापेक्षा॥पटत्वेनघटोनास्तीत्यादिबुद्धेर्घटत्वावच्छिन्नप्रतियोगित्वानवगाहि
नेऽपिघटत्वावच्छिन्नप्रकारतानिरूपितघटत्वादिप्रकारकज्ञानजन्यतावच्छेदकाक्रां राम
तत्वंमहत्त्वमेवैनोक्ता॥तिप्रसंगः॥यथाविशेष्यांशेप्रकारत्वमेवनविशेष्यता
ति

वच्छेदकत्वं ॥ तथासति भूतले घटवदित्यादौ घटादेः स्वस्य च भूतलत्वादिधर्मितावच्छे
दकत्वापत्तेः ॥ किंतु विषयताविशेष्य एव । स च प्रकारताविशेषः प्रकारताभिन्नेत्य
न्यदेतत् ॥ तथा प्रकारतावच्छेदकत्वमपि विषयताविशेषत्वं ॥ ननु प्रकारांशे प्रकार
त्वमेवैतत् ॥ एवं च दंडत्वादिनिर्विकल्पकानंतरं विशेष्ये विशेषणमिति रीत्या जा
यमानस्य दंडीत्याकारकज्ञानस्य दंडत्वादौ प्रकारतावच्छेदकताख्यविषयतावि
शेषस्यानभ्युपगमात् न तदनुपपत्तिः ॥ घटत्वादिनिष्ठतादृशविलक्षणविषय
तारहितस्य पटो नास्तीत्याकारकाभावप्रत्ययस्य क्वचिदपि अनभ्युपगमान्न घ
टत्वादिनिर्विकल्पकानंतरं तदापत्तिः ॥ अत एवावच्छेदकतायाः अव्यासज्यवृत्ति
त्वे महानसीयवह्निर्नास्तीत्याकारकाभावप्रत्ययस्य महानसीयत्वाद्यवच्छिन्नप्रति
योगिताकत्वावगाहित्वं न संभवतीति महानसीयत्वादेर्वह्नित्वादिनिष्ठायां प्रतियो

१० गितावच्छेदकतायामेव सामानाधिकरण्यप्रत्यासत्त्याऽवच्छेदकत्वात् ॥ तथा चैतस्य महा
नसीयत्वविशिष्टवैशिष्ट्यानवगाहितया वह्न्यादौ महानसीयत्वप्रकारकज्ञानमप्यन्य
कालेऽपि आपत्तिः ॥ न च वह्नित्वविशिष्टमहानसीयत्वादेरपि महानसीयवह्न्य
भावप्रतियोगितायां विनिगमनाविरहादवच्छेदकतया अव्यासज्यवृत्तित्वेऽपि कथं
तत्र तयोरन्यस्य महानसीयत्वावच्छिन्नप्रतियोगिताकत्वावगाहित्वं संभवतीति वाच्यं ॥
अवच्छेदकतया अव्यासज्यवृत्तित्वे विनिगमनाविरहेण तत्रोभयस्य प्रतियोगिता
वच्छेदकत्वेऽप्यवच्छेदक[illegible]भेदेन प्रतियोगिताभेदादेकस्याः प्रतियोगिताया उभयध
र्मावच्छिन्नत्वासंभवात् ॥ तादृशाभावबुद्धेर्वह्नित्वमहानसीयत्वोभयावच्छिन्नप्र
च तियोगितानिष्ठसंसर्गताकत्वघटितवह्नित्वधर्मितावच्छेदककमहानसीयत्वप्रका
रकज्ञानजन्यतावच्छेदकाक्रान्ततयाऽपादयितुमशक्यत्वात् ॥ ननु वह्नित्वावच्छिन्न राम

प्रतियोगिकता

त्वविशिष्टसंसर्गकत्वे सति महानसीयत्वावच्छिन्नत्वविशिष्टप्रतियोगितासंसर्गक
त्वस्य तादृशज्ञानजन्यतावच्छेदकत्वोपगमान्महानसीयवह्निर्नास्तीत्यादेश्च तादृ
शधर्माभ्यां प्रत्येकमवच्छिन्नस्य प्रतियोगिताद्वयस्यैव संसर्गत्वोपगमान्न दोष इति
वाच्यं ।। तादृशधर्मस्य जन्यतावच्छेदकत्वे महानसीयो नास्ति वह्निर्नास्तीति समू
हालंबनबुद्धौ तथाविधज्ञानस्य व्यभिचारात् ।। वार्यतां वा तत्र कथंचिद्व्यभिचारः
तथापि सुरभिजलं नास्तीत्यादावगतिरेव ।। तत्र जलत्वावच्छिन्नसौरभादेः परंपरा
संबंधेनैवावच्छेदकतया वक्तव्यतया सौरभविशिष्टजलत्वादेः साक्षात्संबंधेनावच्छेद साक्ष
कत्वे लाघवस्यैव विनिगमकत्वात् सौरभादेः प्रतियोगितानवच्छेदकतया तदवच्छिन्न
प्रतियोगिताकत्वावगाहित्वासंभवादित्यनुपपत्तिरपि समाहिता ।। उक्तप्रतीतिर्महान
सीयत्वावच्छिन्नप्रतियोगिताकत्वानवगाहित्वेऽपि महानसीयत्वादेः प्रकारतावच्छे
त्वा

ग०वि०

११ दकतत्प्रकारकज्ञानस्यापि भ्रमत्वात् ॥ अथ तद्धर्मावच्छिन्नप्रतियोगिताकत्वानवगाहित्व भ्रा
वप्रत्ययेतद्धर्मप्रतियोगिनिष्ठप्रकारतायमवच्छेदकत्वोपगमे वन्ध्यादिसामान्याभावबोधे
ऽपि महानसीयत्वादिप्रकारतया भासतामिति चेत् ॥ इष्टमेवैतत्सौंदडोपाध्यायमतम
म नुयायिनां तत्प्रतियोगितावच्छेदकप्रकारेणैव प्रतियोगिनोभानमिति नियमस्या
सिद्धेः ॥ अथैवं महानसीयवन्ह्यभावप्रत्ययस्य वन्ह्याद्य उपलक्षणविधया म
हानसीयत्वावगाहिनोवन्ह्यादिसामान्याभावप्रत्ययस्य चाविलक्षणतया महान
सीयत्वा विषयकवन्हिमानिति बुद्धौ तयोर्द्वयोरेव प्रतिबंधकत्वमप्रतिबं
धकत्वं वा स्यात् ॥ ननु प्रथमस्यातोघात्वे द्वितीयस्यत्यात्वमिति चेत् ॥ तदाकरणं
तामवधानपरेण भवता । महानसीयव त्वाद्यवच्छिन्नाभावबुद्धौ वच्छेद
कतायाअव्यासज्यवृत्तित्वकल्पे महानसीयवन्हित्वा वच्छिन्नत्वविशेषिताव राम

अनुपयुज्य ११
तेते २

धेदकतानिरूपकत्वं प्रतियोगितांशे भासेत ॥ वन्हिसामान्याभावे च महानसीय
त्वाद्यवच्छिन्नत्वं नावच्छेदकतायां भासत इति विशेषः ॥ नन्वप्रतियोगितावच्छेदकांशे
विशेषणतापन्नस्यैव प्रतियोगितावच्छेदकतावच्छेदकत्वं भासत इति नियमः यथा दंडी
नास्तीत्यादौ दंडत्वादेः ॥ एवं च महानसीयवन्हिर्नास्तीत्यादौ वन्हित्वांशे ऽविशेष
णस्य महानसीयत्वादेः कथं तथा भानमिति ॥ सैदृलमते समवायित्वयावा
च्यत्ववन्नेत्यादि भेदप्रत्यये प्रतियोगितावच्छेदकांशे ऽविशेषणस्यापि समवायित्वा
देः प्रतियोगितावच्छेदकतावच्छेदकत्व भानेन न तादृशनियमस्यासिद्धेः ॥ अन्यमते प्या
श्रयतासंबंधेनावच्छेदकत्वे तावच्छेदकत्व भानम् एवं तथा नियमः ॥ ननु सामानाधि
करण्यप्रत्यासत्त्यवच्छिन्नस्य तस्य भाने । तादृशं चावच्छेदकतावच्छेदकत्वमवच्छेदकत्व
विशिष्टविशेषणतापन्नस्यैव भासत इति नियमः ॥ अत एव वन्हिर्नास्तीत्याकारक
प्रतीतौ ~~महानसीयत्व वन्हिर्नास्ती~~ महानसीयत्वविशिष्टवन्हित्वावच्छिन्नप्रतियोगिता

न

कहैं भासत इति न पर्वतो वह्निर्नास्तीत्याकारकप्रतीत्यापत्तिः॥ एवं व्यधिकरणध
१२ र्मावच्छिन्नाभावानभ्युपगमे तत्प्रतियोगितावच्छेदकधर्मप्रकारेणैव प्रतियोगिनो
भाननियमेऽपि साक्षात्परम्परासाधारणप्रतियोगितानिरूपितावच्छेदकत्वमेव वि
वक्षितं॥ तच्चावच्छेदकतावच्छेदकसाधारणमिति न दोषः॥ एवं घटो भविष्यति
घटो नष्ट इत्याकारकप्रागभावध्वंसप्रतीतौ घटत्वादेरतिप्रसक्ततया ध्वंसप्रा
न गभावप्रतियोगितावच्छेदकत्वेनोपलक्षणतयैव प्रतियोगिनो भानात् विशिष्ट
वैशिष्ट्यानवगाहितया घटत्वादिनिर्विकल्पकानन्तरमपि तदापत्तिरित्यपीह
शब्दाकारानुसरणमन्तरा शक्यवारणमेव॥ एवमनुयोगितावच्छेदकप्रकारकज्ञान
स्यापि तद्धर्मनिष्ठधर्मितावच्छेदकप्रकारकबुद्धावेव हेतुता न तु तद्धर्मविशिष्टानुयो
गित्वावच्छिन्नसंसर्गताकत्वमपि कार्यतावच्छेदककोटौ निवेशनीयं॥ गौरवात्॥ राम

तद्विशिष्टानुयोगिकत्वावच्छिन्नसंसर्गकबुद्धौ तद्धर्मीय धर्मितावच्छेदकत्वनियमा
देवताद्दशबुद्धौ नियमतस्तद्धर्मप्रकारकज्ञानापेक्षोपपत्तिः ॥ दंडादिविषयक[illegible]निर्वि
कल्पकानंतरं दंडीत्याकारकज्ञानोत्पत्ता विवक्षणैकव्याजेनैकत्र द्वयमिति री
त्याऽपि दंडकुंडलाद्युभयप्रकारकदंडादिधर्मितावच्छेदकज्ञानमुत्पद्यते ॥ दंडी चै क
त्रः कुंडलीत्यादिवाक्याच्चैत्रत्वावच्छिन्नविशेष्यकदंडसंबंध्यादिप्रकारक[illegible]
[illegible]कावांतरवाक्यार्थज्ञानरहितस्य पुंसः खलेकपोतन्यायेन जायमानायां त
मन्वयबुद्धौ दंडसंबंध्यादिर्न कुंडलसंबंध्यादिधर्मितावच्छेदकत्वमुपगम्यते ॥ अपि
तु चैत्रत्वादावेव तदुभयधर्मितावच्छेदकत्वं चैत्रत्वादेः पदार्थतावच्छेदकत्वयात
त्प्रकारकपदार्थोपस्थितेः खलेकपोत[illegible]न्यायेनापि प्राकसत्त्वनियमात्तावतैव

त बोध्यस्य

नस

१२ न्यथवैाध्यस्यसधर्मितावच्छेदककत्वनियमोपपत्तेः॥एवंदेशीयधर्मितावच्छेदकप्रका
रकज्ञानस्यस्वतंत्रहेतुत्वाकल्पनेनापि [illegible] लाघवं॥जन्ययागे घप्रागभाववान्
गे घवान्नवागोस्तद्देशागवयपदवान्च्योनवाद्व्यवृत्तिगुणवृत्तिर्नवेत्याकारकसंशे
येषु गं घप्रागभाववगोस्ताद्दृश्यद्व्यवृत्तित्वाद्युपलक्षिते धर्मिणि कोटिवैशिष्ट्यावगा
हिषु विशिष्टानुयोगिकवैशिष्ट्यानवगाहित्वयानुयोगितावच्छेदकप्रकारकज्ञा
त्त नजन्यतावच्छेदकानाक्रांतेषु तद्धर्मितावच्छेदकज्ञानानांस्वातंत्र्येण हेतुत्वकल्प
नस्यावश्यकत्वापत्तेः॥एवंविशेष्यताप्रकारतोविषयतात्वेनानुगमय्यतद्धर्मवि
त्तिविषयताकबुद्धित्वमेवतद्धर्मप्रकारकज्ञानजन्यतावच्छेदकमंगीकार्यमित्यके
वविशेषणतानुयोगितावच्छेदकप्रकारकज्ञानयोर्द्विविधविशिष्टवैशिष्ट्यबोध राम

हेतुतेत्यपि लाघवं ॥ तद्धर्मप्रकारकज्ञानमत्यन्यकालीनतद्धर्मविशिष्टसंसर्[illegible]गिक
बुद्धौ तद्धर्मस्य संसर्गिकविषयतानिरूपितविषयताविशेषात्मकमवच्छेदकत्वेन
स्वीक्रियते ॥ दंडत्वादिनिर्विकल्पकानंतरं जायमानायां दंडीत्यादिबुद्धौ दंड
त्वादेः प्रकारतावच्छेदकतात्मकविषयताविशेषवत् ॥ एवं च प्रतियोग्यंशे व्यधिक
रणधर्मावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वेऽपि नक्षतिः ॥ इत्यभिसंध्यैव
दीधितिकारश्चक्रवर्त्तिलक्षणे व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य सामान्य
मुपेक्ष्य द्रव्यत्ववन्हित्वाभ्यां वन्हिर्नास्तीत्यादिप्रत्ययविषयाभावमवच्छेदकतापर्या
प्तिनिवेशप्रयोजनप्रदर्शनायानुसृतवान् इत्याहुः ॥ अन्ये तु ॥ विशिष्टपर्या
प्तप्रकारताकत्वं विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकं ॥ दंडत्वा

ग०वि०वै०   शुद्ध २

दिनिर्विकल्पकानंतरोत्पन्नस्य दंडीत्याकारकज्ञानस्य पुरुषविशेष्यतानिरूपि
१८ तप्रकारतायां दंडादेर्विषयत्वापत्तिः। ननु दंडत्वादिरूपविशेषणांतर्भावेन तत्सत्त्वादितिः
अभावबुद्धौ प्रतियोगिनिष्ठप्रकारतायास्तद्विशेषणीभूतधर्मांतर्भावेन पर्याप्तिनि
यमात्तत्त्वेन घटो नास्ति घटो भविष्यति घटो नष्ट इत्यादिबुद्धेः घटत्वादिविशि
न ष्टनिरूपितत्वावच्छिन्नसंसर्गावगाहित्वेऽपि नु घटत्वादिनिर्विकल्पकानंतरमा
पत्तिः॥ अथ पुरुषादिनिष्ठविशेष्यतानिरूपितप्रकारतायां दंडत्वांतर्भावेन पर्या
प्तेर्न कथं दंडी पुरुष इत्यादिबुद्धेः पुरुषांशे दंडत्व[illegible]प्रकारतया भ्रमत्वापत्तिः॥ न
विपरी वा पुरुषो न दंड इत्यादिज्ञानप्रतिबध्यत्वं। तदभाववति तत्तद्विशेषणतानापन्न
त २ धर्मप्रकारकत्वस्य भ्रमत्वरूपत्वे धर्मिणीतरविशेषणतानापन्नतद्धर्मप्रकार राम

१८

कत्वस्य तद्विरोधिप्रतिबध्यतावच्छेदकत्वेनैव चाभावांशे स्वावच्छिन्नप्रतियोगिताकत्व
संबंधेन प्रतियोगिरूपविशेष्यपारतंत्र्ये णप्रमेयत्वप्रकारकत्व यत्प्रमेयं नास्ती
ति बुद्धेः भ्रमत्वानुपपत्तिः॥ तदंशे ताहृशसंबंधेन प्रमेयत्वादेः बाधग्रहेऽपि ताहृश
बुध्यापत्तेरिति चेन्न॥ तन्मात्रपर्याप्तप्रकारतायास्तत्र निवेशेनैवोपपत्तेः॥ दृ
तरविशिष्टतद्धर्मवैशिष्ट्यावगाहिबुद्धव्या ज्यवृत्तेरपि प्रकारतायाः तद्ध
र्मे स्वीकारेणैव तस्यास्तद्धर्माभावविषयकप्रतिबध्यत्वनिर्वाहः॥ ताहृशी च प्रकार
बु ता निर्विकल्पकानंतरजातबुद्धावव्यक्ता॥ घटादिर्नो विशेषणमित्यादिरीत्या बुद्धौ केवलं
~~...~~ मित्यादिरीत्या विषयतानवच्छिन्नविशेष्यतीत्वव्यापिका॥ तदा तद्धर्मविशेष्य
तापन्नादौ तत्तदीयप्रकारतैवं तत्रानिवेश्यते॥ तन्निरूपित विशेष्यताभिन्नत्वं त

तत्र

निरूपितविशेष्यता ऽनवच्छिन्नसंबन्धाऽव्य(?)संतार्थः ॥ दंडीपुरुष इत्यादिविशिष्टवै
शिष्ट्यबोधीयदंडत्वादिविशिष्टपर्याप्तप्रकारतादंडत्वादिप्रकारतानिरूपित
विशेष्यतारूपातदवच्छिन्नैवेत्या ॥ अत एव विशिष्टघटकतद्विशेष्यविशेषणसंबं
धानां विशेषणविशेष्यभाववैपरीत्येपि विलक्षणतयातद्वैपरीत्यविलक्षणप्रका
रतायावैलक्षण्यानुपपत्तिरित्यपिसमाहितं ॥ उक्तद्विरूपऽवांतरविशेष्यविशेष
णभाववैलक्षण्यस्य विशिष्टपर्याप्तविषयतावैलक्षण्यनिर्वाहकत्वानोक्तातिप्र
संगः ॥ एतेनाभावबुद्धेः प्रतियोग्यंशे विशेष्यविशेषणमितिरीत्या विषयत्वस्या
प्रामाणिकत्वेऽपिकस्याश्चित्तस्याः प्रतियोगिवैशिष्ट्यंशे भ्रमत्वमुपपद्यते ॥ तत्त
द्विशेषणतावच्छेदकप्रकारकज्ञानेस्यापि तद्धर्मावृत्तिः सतीन(?) तद्धर्मप्रकारतानिरू

पितविशिष्यतापन्नस्य निर्यायप्रकारतातच्छालिबुद्धित्वमेवजन्यतावच्छेदकं ॥ अतःलो
हितवन्हिमानित्यादौलोहित्यविशिष्टवन्ह्यप्रसिद्धावपिनक्षतिः ॥ नवाङ्गतरावशि
ष्टत्वधर्मवैशिष्ट्यबुद्धौतद्धर्मप्रकारकधियोव्यभिचारइतिवदंति ॥ प्रद्युम्नास्त्ववा
व वैञ्चपंथानोविशेषणावच्छिन्नविशेष्यविशेषणयोर्व्यासज्यवृत्तिर्विशिष्टव्याप्य
धर्मइत्यभितवंतंमणिकारंयावद्विशेषाभावाधिकरणवृत्तित्वरूपविशेषणांतर्भा
वेनसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यपर्यादिस्माद्दत्त्वाधिकरणवृत्ति
त्वेतदवच्छेदकंस्वेतिवदं तदीधितिकारमनुसरंतइतिनसिद्धांतविरोधमा
वहतः ॥ अनयोरुपादेयताऽनुपादेयताप्रयोजकविशेषःस्फुटएवेतिस्वय
मूहनीयं ॥ अथविशिष्टनिरूपितविलक्षणसंसर्गानवगाहिज्ञानेकेवलंवि

शेष्ये विशेषणमिति रीत्या विषयतातो विलक्षणायां विशिष्टवैशिष्ट्यविषयतायां
१८ मानाभावः ॥ विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकस्योपदर्शितभावधी
ति साधारण्यानुरोधेन तत्सिद्धिरिति नाशंकनीयं ॥ तस्य तत्सामानाधिकरण्यविरहे
ऽप्यभावबुद्धौ प्रतियोगिविशेषणीभूतधर्मवत्प्रकारक[illegible]धीयः स्वतन्त्रहेतुतया तद्धर्मविष
यकनिर्विकल्पकानन्तरं तद्धर्मविशेषितप्रतियोगिकज्ञानादिप्रसङ्गस्य वारणसंभ
विलक्ष वात् ॥ लाघवेन विषयतासिद्धेः स्वीयांतविरुद्धत्वात् ज्ञानाकारावैलक्षण्येनानुभवस्य
ण ६ सोपयोगत्वादिति चेन्न ॥ यतो विशिष्टनिरूपितवैलक्षण्यसंसर्गावच्छिन्नप्रकारताप्र
त्यसंयोगादिसंसर्गावच्छिन्नप्रकारतातो ऽतिरिच्यते इत्यत्र सर्वेषामविवादः ॥ घटो नष्टः प
टेन घटो नास्तीत्याद्यभावबुद्धेरपि अनुयोगिताविशेषसंबंधावच्छिन्नप्रकारतावि
शेष्ये विशेषणमिति रीत्या विशेषणनिर्विकल्पकानंतरं जायमानघटवद्भूतलमित्यादि राम
ज्ञानीयघटादिप्रकारतातो ऽतिरिक्तेति सर्वानुमतं ॥ अभावबुद्धौ प्रति[illegible]योगि[illegible]विशे १८

ता

षण धर्मि[redacted] धर्मप्रकारी कधीयः स्वातंत्र्येण हेतुत्वाकल्पनानुरोधेन तादृशप्र
कारताया विशेषणांतर्भावेन पर्याप्तिः तदवच्छिन्नत्वं वा कल्प्यते न त्वतिरिक्त विषयतेति घट
त्वादिप्रकारकज्ञानोत्तरं जायमानात्तद्विशिष्टप्रतियोगि[redacted]त्वावच्छिन्नवैशिष्ट्यावगा
हि भूतलं घटवदित्यादिज्ञाने च या घटादिप्रकारता तत्र तादृशवैलक्षण्यं नास्माभिरु
पगम्यते। येन घटादिनिर्विकल्पकानंतरं जायमानत[redacted]या विधविषयताऽतिरिक्त
विषयता तत्रापद्येत ॥ अथ तद्धर्मप्रकारतानिरूपितविशेष्यतापन्नप्रकारकबुद्धित्वमे
व तद्धर्मप्रकारधीजन्यतावच्छेदकमस्तु किं वैलक्षण्यकल्पनया सर्वत्र घटवदित्याकारकं
ज्ञानं घट इत्याकारकज्ञानपूर्वकमेवास्तु एकपदार्थविशेष्यकापरप्रकारकं[redacted]द्बो ३१
धोपि सर्वत्रावांतरवाक्यार्थज्ञानपूर्वक एवास्तु ॥ अस्तु वा प्रत्यक्षत्वमेव जन्यतावच्छेद
कं ॥ एवंच महानसीयत्वादिविशिष्टबुद्धेः प्रागनुपस्थितावपि विशिष्टलाघवतोपनी

वन्हे

५ पेक्षयैव तज्जन्मतेकार्यतावच्छेदकं लघु विशेषणावच्छिन्नप्रकारताकत्वेनैव तज्जन्यतोपे

ग०वि० क्षयाऽपि कार्यतावच्छेदक ५

तज्ज्ञानसीयत्वविशेषितवह्निविशेष्यकानुमित्युत्पादेऽपि न क्षतिरिति चेन्न ॥ घटवादि

१८ त्याकारकैव्यक्तीनामनंतानां कल्पनापेक्षयोक्तवैलक्षण्यकल्पनाया एवोचितत्वात् ॥

त्व। घटादिप्रकारतानिरूपितविशेष्यतापन्ननिष्ठप्रकारतायां घटत्वादिवृत्ति [redacted]

त्वानिवेशेन लाघवमेतन्मते ज्ञानकल्पनागौरवं फलमुखमिति चेत् ॥ अस्तु व्यासज्यवृ

त्तिविषयतापक्षीयकार्यतावच्छेदको लाघवमित्यलमतिविस्तरेण ॥ ॥ विशिष्टवैशि

ष्ट्यबोधो द्विविधः ॥ अनवच्छिन्नविशेषणतावच्छेदकताकोऽवच्छिन्नविशेष

णतावच्छेदकताकश्च ॥ तत्रानवच्छिन्नदंडत्वादिविशेषणतावच्छेदकताकदंडीत्या

दिबोधे स्वरूपतो दंडत्वप्रकारकं ज्ञानं हेतुः ॥ अन्यथा जातित्वादिना दंडत्वादिप्रकार

कजातिमानित्यादिज्ञानाद्दंडीत्यादिविशिष्टवैशिष्ट्यबोधापत्तेः ॥ न च स्वरूपतो

दंडत्वाप्रकारकबोधे स्वरूपतो दंडत्वविषयकज्ञानस्य हेतुत्वयात्तादृशाकारेणभा राम

विशिष्टवैशिष्ट्यावगाहिज्ञानात्मकप्रत्यक्षे
...लाकारकज्ञान २

१८

२ जायन्तेऽर्दवारितात्॥ किंचिद्धर्मावच्छिन्नविशेषणतावच्छेदकताक दंडिमानित्यादिबो २

धेऽनेनोक्तानुपपत्तिरिति वाच्यं॥ यत्र दंडत्वादिनिर्विकल्पकद्वितीयक्षणे जातिवै
ण्डत्व नैष्प्रकारकस्मरणं तदुत्तरं ताहशाबोधे च विशेषणतावच्छेदकतावच्छेदक
प्रकारेण विशेषणतावच्छेदकप्रकारकज्ञानं हेतुः॥ यत्र द्रव्यत्वादिना दंडप्रकार
कज्ञानं दंडत्वादिना दंडादिस्मरणं विशेष्यकज्ञानं च वर्तते तत्र दंडिमानित्याकार
कविशिष्टवैशिष्ट्यबोधानुदयात्॥ तत्र च विशेषणतावच्छेदकीभूततत्तद्दंडादिविषय
तानिरूपितदंडत्वादिप्रकारतानिरूपितप्रकारताशालिज्ञानत्वेन हेतुत्वं तथा च दंड
त्वादिना दंडान्तरज्ञानादप्येवं दंडादिविषयक दंडिमानित्यादिविशिष्टवैशिष्ट्यबोधो
जायते इति सामान्यलक्षणप्रत्यासत्तिमंगीकुर्वाणा नवीना वदंति॥ यत्र विशेषण
तावच्छेदकं दंडत्वादिमपि किंचिद्धर्मावच्छिन्नं तत्रापीदृशरीतिरनुसंधेया॥ एतादृशादि
शा विशिष्टानुयोगिकवैशिष्ट्यबोधे तद्धेतु विशेष्यतावच्छेदकप्रकारकज्ञानयोः विशेषोऽव

गु॰वि॰वै॰ सेय॥ एवं[redacted] विशिष्टवैशिष्ट्यबोधः क्वचिद्विशेषणतावच्छेदकांशे निर्ध[redacted]र्मितावच्छेदककः
यथा दंडवान्नित्यादि। तत्र दंडत्वादिविशेषणतावच्छेदकस्य धर्मितावच्छेदकमुद्रयाकस्याप्य
[redacted] भानात्॥ क्वचित्तु तदंशेऽस धर्मितावच्छेदकः॥ यथा रक्तत्वदंडत्वादिनाना धर्मावच्छिन्न विशेषण
१८ ताको[redacted]रक्तदंडवान्नित्यादिबोधः॥ तत्र च फली[redacted]ज्ञानं यत्धर्मं धर्मितावच्छेदकीकृत्य विशे
षणतावच्छेदकज्ञानं तत्धर्म[redacted]धर्मितावच्छेदकक विशेष[redacted]णतावच्छेदकप्रकारक ज्ञानं हेतुः॥ एवं
निरूपि च तत्र दंडत्व[redacted]निष्ठधर्मितावच्छेदकतो[redacted]र क्तत्वादिप्रकारकज्ञानत्वेन हेतुता॥ जन्यतावच्छे ता
त दकं च दंडत्वरूपधर्मितावच्छेदकविशिष्टविशेषणतापन्नरक्तादिविशिष्टवैशिष्ट्यबुद्धित्वं[redacted]
[redacted] तदधर्म्य दंडत्वादिनिष्ठधर्मितावच्छेदकतानि
रूपकरक्तत्वप्रकारतानिरूपितायरक्तत्वाद्यवच्छिन्नप्रतियोगिताकत्वावच्छिन्नसंसर्गता
निरूपकप्रकारतात्वात्किंच॥ यत्र परस्परं विशेष्यविशेषणतावच्छेदकभानापन्नतु[redacted] राम
ल्यकक्षरक्तत्वदंडत्वाद्युभयविशिष्टदंडादेर्वैशिष्ट्यं भासते॥ यत्र वा दंडत्वादिधर्मिताव
८x तत्र दंडत्वादिरूपविशेषणतावच्छेदकस्य रक्तत्वाद्यपरधर्मधर्मितावच्छेदकमुद्रया भानात्॥ x८ १८

छेदकतापन्नरक्तत्वादिविशिष्टवैशिष्ट्यं भासते ॥ तत्र व्यभिचारवारणाय दंडत्वनिष्ठध
र्मितावच्छेदकतानिरूपकत्वं रक्तत्वादिप्रकारता विशेषणमुपात्तं ॥ केवलं विशेषणमितिरीसं
निरूक्त जायमानेन रक्तदंडवानित्यादिबोधे व्यभिचारवारणाय निरूपकत्वं रक्तत्वप्रकारतानिरूपितप्र
संसर्गे कारतायां विशेषणमुपात्तं ॥ एवमनुयोगितावच्छेदकशिस्सधर्मितावच्छेदकविशिष्टानुयो क
ता ३ गिकवैशिष्ट्यबोधे स्वधर्मितावच्छेदककानुयोगितावच्छेदकप्रकारकज्ञानस्य हेतुता कल्प
नीया ॥ केवलं विशेष्ये विशेषणमित्यादिरीत्यायोर रक्तदंडवानित्यादिबोधस्तत्र द्वा वृत्ति
विशिष्टपर्याप्तप्रकारता विशेषस्य विशिष्टवैशिष्ट्यबोधे स्वीकारपक्षे रक्तत्वादिप्रकारता
त निरूपितदंडत्वाद्यवच्छिन्नविशेष्यतावच्छिन्नातदभिन्नावाया दंडत्वसाधारण प्रकारता
ना तच्छालिबुद्धित्वं ॥ विशेषणतावच्छेदकरूपविषयता विशेषस्य विशिष्टवैशिष्ट्यबोधी
यस्य रक्तत्वादिवभ्युपगमपक्षे नु दंडत्वादिनिष्ठधर्मितावच्छेदकता निरूपकप्रकारता

मन्नवेन्ने -

याऽवछिन्नातदभिन्नावायातादृशविलक्षणरक्तत्वादिप्रकारतातत्शालिबुद्धित्वमेवजन्य
१९ तावछेदकं॥एवंचरक्तोदंडोमेयइत्यादिविशिष्टानुयोगिकवैशिष्ट्यबोधसाधारणम
पिजन्यतावछेदकंतादृशरूपमितिनतादृशबोधेकारणांतरकल्पनं॥दंडोरक्तोनवेति
संशयानंतरंरक्तदंडवानित्यादिबोधस्यानुभवविरुद्ध[redacted]विशेषणतावछेदक तया
वैशिष्ट्यधर्मितावछेदककविशिष्टवैशिष्ट्यबोधजनकतावछेदकगर्भेनिर्णयत्वंनिवेश्य
तइतिदीधितिकारः॥तन्मतदंडोदौरक्तत्वरूपविशेषणसंदेहाधीनोरक्तवान्नवापु दंड
विशेष्य रुषइत्यादि[redacted]केवलेविशेषणमितिरीत्यैवजायतेननुरक्तत्वादिविशिष्टदंडत्वा
द्यवछिन्नवैशिष्ट्यावगाहीतिनतदनुपपत्तिः॥अथतद्धर्मविशिष्टप्रतियोगिकाभा प्रकार
वबुद्धेस्तद्धर्मविशिष्टवैशिष्ट्यावगाहित्वनियमात्कथमभाववैशिष्ट्येकेवलेविशेष्येवि राम
शेषण[redacted]मितिरीत्यारक्त[redacted]दिविशिष्टदंडादिरूपप्रतियोगिनःप्रकारतयाभानं॥

४ विशिष्टसंशयश्च ६ सा १९

नचाभावबुद्धेः किंचिद्धर्मविशिष्टप्रतियोगिवैशिष्ट्यावगाहित्वमेव नियतं ॥ तत्त्वासत्त्वे भवताद्धत्रा
बुद्धेर्दण्डत्वादिविशिष्टवैशिष्ट्यावगाहितायाः सत्त्वात् ॥ ननु प्रतियोगिविशेषणीभूततयावधर्मविशि
ष्टावगाहित्वमपि तथा तथा च नस्यां रक्तत्वादिविशि[redacted]त्वादिविशि[redacted] दण्डत्वावच्छिन्नवैशिष्ट्याव
गाहित्वेपि नक्षतिरिति वाच्यं ॥ केवलं विशेष्ये विशेषणमित्यादिरीत्या ऽपि यत्किंचिद्धर्मविशिष्टप्र
तियोगिनो ऽभावांशे विशेषणत्वोपगमे दण्डादिसामान्याभावबुद्धावपि डपलक्षणतया रक्तत्वादेः
प्रतियोगिविशेषणतया भानापत्तेः ॥ तथा चाभावांशे रक्तत्वोपलक्षितदण्डत्वावच्छिन्नप्रतियो
गिताकत्वावगाहिनो रक्तदण्डाभाववानित्याकारकज्ञानस्यापि दण्डवानित्यादिविशिष्टप्रतिबंध बुद्धि
कत्वांतरकल्पनापत्तेः ॥ रक्त[redacted]त्वादिनिर्विकल्पकदशायामपि रक्त[redacted] दण्डो नास्तीत्यादि
बुध्यापत्त्येतस्येतिच्चे[redacted]सत्य ॥ विशेषणसंदेहाधीनविशिष्टसंदेहे केवलं विशेष्ये विशेषण
मितिरीत्या रक्तत्वादिविशिष्टस्य प्रतियोगिनो ऽभावांशे विशेषणतया न भानमुपेयते ॥ किंतु तत्र

२० मिथो विशेषणविशेष्यतावच्छेदकभावानापन्नरक्तदंडत्वाद्युभयविशिष्टप्रतियोगितानिरूपितवै
शिष्यमेवाभावांशे भासते तादृशविशिष्टवैशिष्ट्यबोधस्य च विशेषणतावच्छेदकांशे निर्धर्मि
त तावच्छेदकतया नैव विशेषणतावच्छेदकप्रकारकनिर्णयापेक्षेति ॥ नन्वेवं दंडो रक्तो न वेत्या
वान्नवेति दिबाधनिर्णयदशायामपि रक्तदंडत्वावच्छिन्नसंशयापत्तिः ॥ समानधर्मितावच्छेदककज्ञान
स्यैव बाधादिप्रवृत्तिबध्यत्वादिति वाच्यं ॥ तथाविधस्थलीयोभयविशेषणविशिष्टदंडादिसंश
यस्य बाधदशायामिष्टत्वात् ॥ वस्तुतस्तु ॥ दंडत्वसामानाधिकरण्येन रक्तत्वनिर्णयदशा
यामेव दंडत्वावच्छेदेन रक्तत्वेतत्सामानाधिकरण्यमात्रेण च रक्तत्वाभावमवगाहमानात्सं
शयाद्दंडत्वसामानाधिकरण्येन रक्तत्वाभावावगाहि रक्तदंडत्वान्नवेति विशिष्टसंशयस्योत्प
द्यते तथाविधनिर्णयस्य तादृशरक्तत्वाभाववत्कोटिकसंशयाविरोधितया तयोरेकदा सत्त्व
मविरुद्धं ॥ एवं दंडत्वावच्छेदेन रक्तत्वाभाववत्कोटिकसंशयाधीनो रक्तदंडत्वान्नवा पुरुषद
त्याद्याकारकसंशयोऽसिद्ध एव ॥ एवं च दंडत्वावच्छेदेन रक्तत्वावगाहि विशेषणसंदेहाधी राम
५॥ बध्यते तया निरुक्तसमकक्षरक्तत्वदंडत्वाद्युभयविशेषणविशिष्टदंडा २०
दिविशिष्टबुद्धेस्तदप्राति ५

५ किंतुकेवलं ५

नस्तथाविधसंशयो ऽपि तथैत्येव सारं ॥ दंडत्वावच्छेदेन रक्तत्वनिर्णये दंडत्वावच्छेदेन र
क्तदंडवत्ता निर्णयस्यापि संभवाद्दंडवान् पुरुष इत्येतादृशनिर्णयदशायां विशिष्टसंशय
विरोधिविशेषदर्शनसमवधानसंभवोन्न विशिष्टसंशयसंभव इति दंडत्वावच्छेदेन र
युज्य क्तत्वनिर्णयविरोधी रक्तत्वसंशय एव स[illegible] इति बो[illegible]ध्यं ॥ यत्तु ॥ तादृशविशिष्टसं
शयेनोभयधर्मविशिष्टदंडादिवैशिष्ट्यं भासते इति [illegible] रक्तत्वादिविशिष्टवैशिष्ट्या
वगाहित्वमेव तस्येति ॥ तदसत् ॥ तथा सति रक्तपटवान् पुरुष इत्यादिनिर्णयदशायाम या
देहा प्यानुभूयमानस्य दंडधर्मिकरक्तत्वसं[illegible]पुरुषधर्मिकरक्तत्वादिविशिष्ट
दंडसंशयस्यापलापापत्तेः ॥ [illegible] रक्तत्वावच्छिन्नप्रतियोगिताकाभावकोटिकसंश
ये रक्तपटवानित्यादिनिर्णयस्यापि विरोधित्वात् ऽ के चित्तु ॥ तद्धर्मविशिष्टप्रतियोगिवि ह
शेषिताभावलौकिकप्रत्यक्षस्यैव तद्विशिष्टवैशिष्ट्यावगाहित्वनियमः प्रतियोगिवि

त

शेषिता भावभानं तु विशिष्टवैशिष्ट्यबो[redacted]धमर्यादां[redacted]नातिशेते इति दीधितिग्रं
थोपि लौकिकप्रत्यक्षोपरएव ॥ एवं च विशेषणसंदेहादित्ते विष्टसंदेहे विष्टानुभवउप
नीतएव भासते ॥ न तु तदंशे तस्य लौकिकत्वमुपेयते ॥ तत्संशयानं तरं साक्षात्कारि
त्वरूपेण तद्विशेषिता भावावगाहिनोऽनुव्यवसायस्य केनाप्यनभ्युपगमात् ॥ अतस्त
त्रैके वल्ले विशेष्ये विशेषणमिति रीत्यैव रक्तत्वादि विशिष्टप्रतियोग्यभावो भासत इति व श्री
दंति ॥ तदपि न श्रद्धेयं ॥ तादृशसंशयेर क्तत्वादिवद्दंडत्वादेरप्युपलक्षणतया भानोपग
मेरक्तदंडवान्पुरुष इत्यादिनिर्णयस्यापि तदप्रतिबंधकतापत्तिः ॥ रक्तत्वदंडत्वाद्यु
पलक्षितरक्तदंडादिप्रतियोगिकत्वस्य रक्तदंडाद्युभयाभावादिसाधारणतया तादृश
प्रतियोगित्वावगाहिनोऽभाववत्ताज्ञानस्य रक्तदंडत्वादिविशिष्टप्रतियोगिमत्तानिर्ण
तादृशसंशये यापतिबध्यत्वात् ॥ एवं प्रतियोगिकोटौ उपलक्षणविधयायदिकश्चिद भावोपनीत भा राम
१ तादृशैरक्तैर्दंडश्चैउपलक्षणतया भानोप[redacted]गमेतस्यप्रभु घदंडत्वाद्यवच्छिन्नप्रतियोगिता १ नैवम्भा २१
२ कत्वेनाभावावगाहितया प्रभु घदंडत्वादिनादंडादिमत्तानिश्चयप्रतिबध्यतापत्तेः ॥ २ १
त्वा× प्रतियोग्यंशे

स्पते ॥ तत्र धूमादौ हेतौ संशये उपलक्षणविधया पक्षधर्मत्वावगाहिनः पक्षधर्मस्य समा धूम
नाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यावच्छेदकमित्याकारकस्य धूमस्य समा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावावगाहि व्यापकतापरामर्शस्या
नुमितिहेतुतासंभवात् ॥ यत्र पर्वतवृत्ति धूमसमानाधिकरणाभावप्रतियोगितावच्छे
दकत्व~~[illegible]~~त्वावच्छिन्नाभावः साध्यतावच्छेदकेन घटितो ऽपि तु धूमस
मानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावरूपस्तु धूमव्यापकताव
च्छेदकत्वमेव तत्रानुमित्यनुपपत्तिरूपदूषणोद्दीधितिकृता व्यापकतापरामर्शहेतुतावा न
१२ दिमतखण्डनस्यासंगत्यापत्ति[illegible]त्यस्मदुक्तसमाधानमेव सम्यक् ॥ अथ विशिष्टवैस्य
बोधं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतायां दण्डो रक्तो न वेति संश
यानन्तरं रक्तदण्डसंदे[illegible]स्मीत्याकारकविशिष्टवैशिष्ट्यावगाहिनः संशयानुव्यव

सायस्यानुपपत्तिः॥ नन्वतत्र विशेष्ये विशेषणमितिरीत्यैव रक्तत्वं दंडत्वादिविशिष्टदंडादिज्ञा
नांशे विषयतासंबंधेन भासत इति वाच्यं॥ तथा सति निर्विकल्पकोपस्थितरक्त
त्वादिना विशेषितं दंडादिकं विषयीकृत्य रक्तदंडं जानामीत्याकारकज्ञानानुव्यवसायस्यो
त्पादप्रसंगादित्याशंकाऽप्युक्तरीत्यैव निरसनीया॥ अत्रापि तादृशविशेषणविशिष्टवै
शिष्ट्यावगाहित्वस्यैवज्ञानांशेऽस्वीकारात्॥ केचित्तु॥ तादात्म्यसंबंधेन दंडत्वाद्यवच्छिन्न
विशेष्यकरक्तत्वप्रकारकज्ञानस्य रक्तत्वादि विशेषितदंडादिप्रकारतानिरू
पितविशेष्यतासंबंधेनानुव्यवसायप्रतिहेतुत्वकल्पनमावश्यकं॥ अन्यथा यत्र
दंडो रक्त इत्याकारकप्रत्यक्षात्मकं विशेषणतावच्छेदकप्रकारकज्ञानं तदनंतरं च
दंडांशे रक्तत्वप्रकारकं दंड इत्याकारकं स्मरणं तदनंतरं च रक्तदंडं स्मरामीति आ
कारकस्मरणानुव्यवसायस्य प्रसंगात्॥ एवं च विशेष्ये विशेषणमितिरीत्या रक्त

त्वादिविशेषितदंडादिविशेषणकज्ञानमनुपगमेऽपि रक्तत्वनिर्विकल्पकस्थले दर्शितातिप्रसंगाभावइत्याकूः।। परंतु।। दंडादिधर्मिकरक्तत्वादिप्रकारकज्ञानस्य रक्तत्वादिविशेषित
दंडादिविषयकत्वेननानुव्यवसायः धर्मिणो विशेषणवत्तया अनुव्यवसायेन ग्रहणे प्रा
माण्यस्य स्वतोग्राह्यत्वापत्तेरिति रक्तत्वेन दंडं संदेह्मीत्याकारकः ज्ञानं विप्रकारतासंबंधे
न रक्तत्वप्रकारकमेव तादृशानुव्यवसाय इत्याकूः।। अथ रक्तत्व दंडवानित्यादिविशिष्ट
वैशिष्ट्यबोधे [redacted]दंडत्वाद्यवच्छिन्नधर्मिकरक्तत्वादिप्रकारकज्ञानत्वेनैव
हेतुता[redacted]ऽस्तु।। किं गुरुशरीरनिर्णयत्वनिवेशनेन।। दंडो रक्तो न वेति संदेहानंतरं रक्त
त्वविशिष्टदंडवैशिष्ट्यावगाहिज्ञानानुत्पादस्य विवादग्रस्तत्वादिति चेन्न।। संशय
साधारणज्ञानस्य विशिष्टवैशिष्ट्यबोधहेतुता[redacted]वादिना ऽप्रामाण्यशंकास्कंदित
ज्ञानादपि विशिष्टवैशिष्ट्यबोधोत्पादः स्वीकार्यः।। अप्रामाण्यशंकास्कंदितज्ञानस्य सं

शायसमनुगीलत्तया निर्णयकार्ये प्रसेवासाम [redacted] र्थ्यत्वात् ॥ अतोऽप्रामाण्यनिर्णयत्वावच्छि
न्नाभावविशिष्टविशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुतोपगं [redacted] तव्येति विशेष
णतावच्छेदकप्रकारकज्ञानापेक्षयागुरुशरीरस्यतदीयाप्रामाण्यानिर्णयस्य निवेशानौ
चित्यागौरवं ॥ निर्णयमात्रस्यहेतुतावादिनां मते तु त्वप्रामाण्यशंकास्कंदितज्ञानाद
पि निर्णयफलानुदयात्तन्मतेऽप्रामाण्यज्ञानत्वावच्छिन्नाभावस्यैव जनकतावच्छे
दकत्वेलाघवं ॥ न च तन्मतेऽप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैवाखंडस्यतत्त
द्व्यक्तित्वेन जनकत्वमुपगंतव्यमितिनाप्रामाण्यज्ञानीयनिश्चयत्वनिवेश इति वा
च्यं ॥ अभावस्य तत्तद्व्यक्तित्वेन जनकतावच्छेदकतायाः सिद्धांतविरुद्धत्वात् ॥ तथा
सत्यप्रामाण्यनिश्चयघटान्यतरत्वावच्छिन्नप्रतियोगिताकानामभावव्य [redacted] क्तीनाम राम
पि तत्त [redacted] द्व्यक्तित्वेन निवेशाविनिगमनाविरहप्रसंगात् ॥ एवं विशिष्टवैशिष्ट्यबोधं

प्रतिनिर्णयत्वे नहेतुत्वेरक्तदंडवानिति।विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षंप्रतितादृश
प्रत्यक्षेच्छाविरहविशिष्टायांरक्तत्वाभावादिसाधकदंडादिपक्षकानुमितिसामग्र्यास्त
थाविधविधानुमित्यादिकंप्रतितथाविधानुमि[illegible]कतीच्छाविरहविशिष्टतथावि
धविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्र्याःप्रतिबंधकत्वाकल्प
नेनलाघवं।।तथाविधविशिष्टवैशिष्ट्यबोधजनकनिर्णयस्यविपरीतनिर्णय[illegible]वि
धयातादृशानुमित्यादिप्रतिबंधकतयातादृशसामग्र्याःसंवलनस्यैवोत्संशयसाधा संभवा
रणज्ञानस्यहेतुतामतेचसंशयघटितविशिष्टवैशिष्ट्यबोधजनकसामग्र्यासहतादृ
शानुमित्यादिसामग्र्याःसंवलनसंभवतीतितादृशप्रतिबंधकताकल्पनमावश्यकमे
वेतिगौरवं।।अत्रकेचित्।रक्तोरक्तदंडवान्नुकषइत्याकारकविशेषणधर्मिकसंश
योऽनुभवविरुद्धः।सर्वत्रसंशयेधर्मिणोमुख्यविशेष्यतयैवानुभवात्।।एवंचसंश

२६ यविशेषितया विशिष्टस्य वैशिष्ट्यमिति रीत्या तादृशसंशयापत्त्य [redacted] संभवेऽपि
रक्तत्वतदभावादीनां स्वतंत्रोपस्थितिदशायां विशेष्ये विशेषणमिति रीत्या तादृशसं
शयापत्तिः रक्तसेवांति विशेष्ये विशेषणमिति रीत्या रक्तत्वविशिष्टदंडादिप्रकारकबो
धे दंडधर्मिकरक्तत्वादिसंशयस्य प्रतिबंधकत्वं स्वीकरणीयं तदभावस्य कार्यसह
भावेन हेतुत्वात् सर्वक्षणे तत्सत्वेपि कार्यकालेऽसत्वान्न तथाविधसंशयापत्तिः ॥
इयं च तादृशप्रतिबध्यतावच्छेदकरक्तत्वादिप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्य
नि तापन्न [redacted] शिष्टप्रकारताशालित्वस्य रक्तदंडवानित्यादिविशिष्टवैशिष्ट्यबोधसाधा
रणतया संशयानंतरं तथाविधविशिष्टवैशिष्ट्यबोधापत्त्यसंभवात् ॥ तज्ञेन कृता
तावच्छेदके निर्णयत्वस्यानिवेशेऽपि न क्षतिः ॥ अथ यत्र दंडो रक्तो न वेति संशयानं राम
तरं द्वितीयक्षणे दंडो रक्त इत्याकारकस्मरणात्मकनिश्चयस्तद्वितीयक्षणे रक्तदं २७

ष्टवैशिष्ट्य २

उक्तानि त्रिज्ञानोपपत्तये विशिष्टवैशिष्ट्यानवगाहित्वमवश्यं निवेशनीयं तादृशप्रतिब संशय १
ध्यतावच्छेदककोटाविति कथं तादृशसंशयप्रतिबध्यतावच्छेदकस्य विशि बोधसाधार
ण्यं ॥ न च विशिष्टवैशिष्ट्यानवगाहित्वसंशयाभावजन्यतावच्छेदकत्वे विशिष्टवैशिष्ट्य
बोधोत्पत्तिदशायां संशयाभावरूपकारणवशाद्विशिष्टवैशिष्ट्यानवगाहिज्ञानत्वाव
च्छिन्नापत्तिरिति संशयप्रतिबंधकतायां निश्चयमुत्तेजकीकृत्यैव दर्शितस्थले रक्तदं
उक्तानि त्रिज्ञानोत्पाद इति वाच्यं ॥ संशयप्रतिबंधकतायां निर्णयस्योत्तेजकत्वे निश्च
याभावविशिष्टसंशयस्यैव प्रतिबंधकत्वे विनिगमकविरहेण प्रतिबंधकताबाहुल्य ना
स्यावच्छेदकगौरवस्य च प्रसंगात् । संशयप्रतिबध्यतावच्छेदके विशिष्टवैशिष्ट्यानव
गाहित्वनिवेशनस्य तदवच्छिन्नप्रति निर्णयत्वेन प्रतिबंधकत्वस्य च स्वीकारात् ॥ व
स्तुतो विशिष्टवैशिष्ट्यानवगाहित्वं न संशयप्रतिबध्यतावच्छेदकमुच्यते ॥ किंतु रक्तत

२ ४ स्यसंशयविशिष्टनिश्चयाभाव ४

विशिष्टप्रतियोगिकत्वानवच्छिन्नसंसर्गतानिरूपकीभूततायारक्तत्वप्रकारतानिरूपितदंड
त्वावच्छिन्नविशेष्यतापन्नप्रकारतानच्छालित्वमेव। संशयानंतरोत्पन्ननिश्चयद्विती
यक्षणोत्पन्नरक्तदंडवानितिबोधेचननयाविधदंडप्रकारतेतिनतदनुपपत्तिः॥ सं
शयप्रत्यक्षकालीनविशिष्टवैशिष्ट्यबोधेचरक्तत्वादिविशिष्टप्रतियोगिकत्वावच्छिन्ना
तदनवच्छिन्नाचसंयोगनिष्ठसंसर्गतास्वीक्रियते। द्विविधसंसर्गिकविषयतायाविरु
द्धत्वेमानाभावात्॥ विशिष्टवैशिष्ट्यबोधीयविशेषणीयप्रकारतायाविशेषणांतरविशि
ष्टतत्तद्विशेषणपर्याप्ततयाविशेषणांतरावच्छिन्नतयावावैलक्षण्यमतेरक्तत्वादि
निरूपितविशेष्यतयाऽवच्छिन्नातदभिन्नावायारक्तत्वादिवर्त्तिनीरक्तत्वावच्छिन्नावाप्र न
कारतासंशयप्रतिबध्यतावच्छेदकेनिवेशनीया॥ नतुतत्तद्विशेषणसंसर्गताविशेष राम
निरूपकत्वमपि। संशयानुत्तरबोधेन्वद्विविधप्रकारतास्वीक्रियते। विरोधात्॥ [illegible]

तथाच निरुक्तसंशयाभावजन्यतावच्छेदकावच्छिन्नोत्पत्तिस्तत्रेष्टैवेति चेत्॥ संशयानं
तर निश्चयोत्पत्तिस्थले तद्द्वितीयक्षणे संशयं विनैव तृतीयक्षण एव रक्तदंडवानिति
बोधः स्वीक्रियते क्षणैकापत्त्यपेक्षत्ति विरहात्॥ तच्च यथाच विशिष्टवैशिष्ट्यबोध
त्वव्यापकस्य रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नप्रकारताशालिज्ञानत्वस्यैव सं
शयप्रतिबध्यतावच्छेदकत्वसंभवात्॥ संशयप्रतिबंधकतायां चाप्रामाण्यनिश्चयाभा
वो न निवेशनीयः॥ अप्रामाण्यनिश्चयास्कंदितसंशयस्थलेपि तादृशसंशयनाशा
नंतरमेव रक्तदंडवानिति बोधोपगमात्॥ अप्रामाण्यग्रहदशायां रक्तारक्तदंडवानि नोऽ
त्याकारकज्ञानापत्तिः॥ नवा रक्तत्वाभावांशेऽप्रामाण्यग्रहास्कंदितसंशयाद्रक्तदंड
वानित्यादिविशिष्टवैशिष्ट्यबोधापत्तिः॥ यत्तु॥ संशये विशेष्ये विशेषणमिति रीत्या॥

बोधे रक्तत्वप्रकारकदंडत्वावच्छिन्नविशेष्यकज्ञानत्वेनैव प्रतिबंधकता॥ ननु रक्तत्व
तदभावोभयप्रकारताकदंडत्वावच्छिन्नविशेष्यकज्ञानत्वरूपसंशयत्वेन दंडत्वाव
च्छिन्नविशेष्यकरक्तत्वाभावप्रकारकज्ञानत्वेन वा गौरवात्॥ तथा च विशिष्टवैशि
ष्ट्यबोधव्यावृत्तधर्मोऽवश्यं वाच्यः॥ प्रतिबध्यतावच्छेदकः॥ अन्यथा विशिष्टवै
शिष्ट्यबोधविलयप्रसंगादिति॥ तदसत्॥ रक्तत्वप्रकारकत्वेन प्रतिबंधकत्वे रक्तदंड
वानित्येतादृशज्ञानोत्पत्तिकाले तदवच्छिन्नाभावास्त्वेन तदभावस्य कार्यसहभाविन
हेतुत्वासंभवाद्रक्तारक्तदंडवानित्येतादृशज्ञानस्य दुर्वारत्वात्॥ अथ रक्तारक्तदंड
वानित्येतादृशज्ञानानुत्पादस्य विवादग्रस्तत्वात्तथा संशये प्रतिबंधकत्वमेवासिद्धमिति
चेन्न॥ दंडो रक्तो न वेति संशयस्य रक्तदंडवानित्येतादृशज्ञानत्वेनैव प्रतिबंधकत्वे
दंडपक्षकरक्तत्वाभावहेतुकानुमिति रक्तत्वाभावविशिष्टदंडपक्षकानुमितिसाम राम

ग्यारक्तदंडवानित्यादिलौकिकप्रत्यक्षस्य प्रतिबंधकत्वाकल्पनाल्लाघवादेवतत्सि
द्धेः संशयस्य प्रतिबंधकताकल्पनं न तु दंडत्वावच्छिन्नधर्मिकरक्तत्वाभावप्रकारक
ज्ञानत्वेनैव प्रतिबंधकत्वोपगमात् ॥ तादृशसामग्रीकालेतथाविधज्ञानत्वावच्छि
न्नसत्ताया आवश्यकत्वात्तस्य प्रतिबंधकताकल्पने तादृशसामग्रीप्रतिबंधकताया
अफलत्वाद्यत्र चिन्नेंद्रियजन्यं दंडो रक्तो इत्याकारकनिर्णयात्मकज्ञानं तत्र तन्मा
त्र एव रक्तत्वांशे लौकिकमपि रक्तदंडवानिति स्वीक्रियते। अतो नोक्तरूपेण प्रति
बंधकतानुपपत्तिरिति वदंति ॥ ॥ अत्रोच्यते ॥ रक्तदंडवानित्येतादृशज्ञानं प्र
ति उक्तसंशयस्य प्रतिबंधकत्वाभिन्नविषयकत्वादि किं प्रति तादृशप्रत्यक्षेच्छाविशि
ष्टप्रत्यक्षसामग्रीप्रतिबंधकतायां तथाविधसंशयाभावनिवेशनाधिक्याद्गौरवं ॥

नुमि

ग॰वि॰वे॰

२७ ताद्दशसंशयस्यदर्शितबाधसाधारणरूपेणाभावनिवेशेदंडेनरक्तदंडेयत्ताद्दश
बाध्याभावस्यतत्रानिवेशाल्लाघवमितितुनसंभवदुक्तिकं॥इच्छाकालेबाधसत्वेप्या
हार्यप्रत्यक्षेसंशयोच्छाविशिष्टप्रत्यक्षसामग्रीप्रतिबंधकतायांबाध्याभावस्यममा
प्यऽनिवेशनीयत्वात्॥यदिचबाधबुध्याविवसंशयेपीच्छायाउत्तेजकत्वंस्वीक्रिय
ते॥तदेच्छाकालीनसंशयाद्विशिष्टवैशिष्ट्यबोधापत्तिरितितन्निर्णयत्वेनहेतुत्व
मावश्यकमेव॥एवंमितरांशेविशेषणतापन्नस्यापिसंशयधर्मितयाभानंभवत्ये
धस व॥अन्यथा[redacted]पक्षेसा[redacted]संदेहदशायामनुमि[redacted]उपपादनायात्संशयसाधारणव्य त्सु
भिचारज्ञानप्रतिबंधकतायांप्राचांसाध्याभावांशेनिश्चयत्वनिवेशेनस्यासंगत्या
पत्तेः॥व्यभिचारज्ञानस्याधेयत्वांशेविशेषणतापन्नेऽधिकरणेसाध्याभाव राम
संशय[redacted]पायोगादितिर[redacted]कारकदंडवानितिबोधवारणायसंशयप्रतिबं
२७

धकत्वमयुक्तमेव। यदि च रक्तारक्तदंडवानिति विरोधवारणाय मा भूत्संशयः प्रतिबंधकः
तथाप्युक्तसामग्रीप्रतिबंधकत्वकल्पनप्रयुक्तलाघवानुरोधेन संशयस्य प्रति
बंधकत्वं कल्प्यमेव। यच्चोक्तं संशयप्रतिबंधकतामते इच्छाविशिष्टरक्तदंडवा
नित्यादिप्रत्यक्षसामग्रीप्रतिबंधकतायां संशयाभावनिवेशाधिक्यगौरवमि
ति तदपि अकिंचित्करं सिध्यभावबाधाभावत्वदभावव्याप्यवत्ताज्ञानाभावादिक
पवकुत्तरकारण घटितत्वेनोक्तानुमितिसामग्र्या रक्तदंडवानित्येताद्दशप्रत्यक्षप्र
तिबंधकत्वाधिक्यापेक्षया इच्छाविशिष्टताद्दशप्रत्यक्षसामग्र्यां संशयाभावनिवे
शस्यैवौचित्यत्वादिति विभाव्यते। तदाऽपि व्याप्यारूपातींद्रियधर्मविशिष्टविशे दि
षणकबाधे ताद्दशसंशयस्य प्रतिबंधकत्वं निर्युक्तिकमेव। विशेषणधर्मिक
ताद्दशधर्माभावप्रकारक[illegible]ननियतानुमितिसामग्रीकाले ताद्दशधर्मविशि
ना

ष्टवैशिष्ट्यावगाहिज्ञानप्रतिबंधसत्तायाआ[redacted]वश्यकत्वात्तत्तद्वत्ताविषयप्रत्य
क्षवारणसंभवात्केनापितादृशसामग्रीप्रतिबंधकत्वाकल्पनात्॥ अतीं[redacted]द्रियध
र्मप्रकारकलौकिकप्रत्यक्षंनसंभवत्येव॥ येनभिन्नेंद्रियादिजन्यतदभावप्रकार
कज्ञानघटितोक्तसामग्रीकालीनतदापत्तिःस्यादितितादृशस्थलीयविशिष्टवै
शिष्ट्यबोधेनिश्चयत्वेनहेतुत्वमावश्यकमेव[redacted]तावतैवचानुमिति[redacted]लक्षणस्य[redacted]
[redacted]विशिष्टवैशिष्ट्यबोधातिव्याप्तिशंकानुदीधितिकृतःसंगच्छते॥ नचव्याप्त्या
दिविशिष्टधूमादिविशेषणकबोधेधूमादिधर्मिकव्याप्त्यादिसंशयस्यत[redacted]धर्मि
कतदभावप्रकारकज्ञानत्वेनप्रतिबंधकत्वेव्याप्त्यभावप्रकारकधूमादिविशेष्यक
शाब्दबो[redacted]धसामग्र्या[redacted]त्तादृशप्रत्यक्षप्रतिबंधकत्वाकल्पनेनलाघवं॥ तादृश राम

शाब्दसामग्रीकाले ताद्दशाभावप्रकारकत्वद्विशेष्यकज्ञानस्य योग्यताज्ञानहेतुताम ता
तेऽवश्यकत्वाद्भवतां तत्र ताद्दशसामग्रीप्रतिबंधकत्वकल्पनमावश्यकं अन्यथा सं
शयात्मकयोग्यताज्ञानघटिततादृशशाब्दसामग्रीकाले तथाविधप्रत्यक्षस्य दुर्वारत्वा
दित्तिवाच्यं ॥ शाब्दबोधं प्रति योग्यताज्ञानस्य हेतुताया निर्युक्तिकत्वात् ॥ तादृशशाब्दसा
मग्रीप्रतिबंधकतायां मतद्वयेऽप्यावश्यकत्वात् ॥ योग्यताज्ञानहेतुतामते तु रक्तत्वादि
विशेषितदंडादिविशेष्यकबोधे रक्तत्वादिसंशयस्य न प्रतिबंधकत्वं ॥ स्वत्वकेपा
तन्यायेन ताद्दशशाब्दबोधे दंडो रक्तो न वेति योग्यता[redacted]संशयस्य हेतुत्वात् ॥
त्वे प्रत्यक्षस्य प्रतिबं[redacted]तावच्छेदकत्वे कार्यसहभावेन तत्प्रतिबंधकत्वासंभवः ॥ रक्त
त्वांशे संशयात्मकत्वद्विशेषितदंडादिसंशयस्य योग्यताज्ञानविधया तादृशशा
ब्दबोधे हेतुतायाः आवश्यकत्वाद्दंडो रक्तत्वनिर्णयस्य प्रागसत्वेऽपि तादृशशाब्दबो

ध्य ३

धस्य सर्वानुभवसिद्धत्वात् ॥ न च दंडो रक्तो न वा पुरुषो दंडी न वेति संशयस्य सम
हालंबनैकसंशयत्वात्तादृशशाब्दबोधो भविष्यतीति वाच्यं। रक्तदंडाभाववान्नियो
दिनिश्चयकाले तथाविधसंशयस्य रक्तो दंडः पुरुषो दंडीति निर्णयस्य च वक्तुं भवेत् तदा
नीतादृशशाब्दबोधप्रसंगवारणाय तत्र पुरुषविशेषणतापन्नदंडांशे रक्तत्वादिप्र
कारकस्य समूहालंबनविलक्षणयोग्यताज्ञानस्य हेतुतायां विवक्षकत्वात् ॥ वस्तु आ
तस्तु दंडत्वधर्मत्वावच्छिन्नधर्मिकरक्तत्वाभावव्याप्यभावादिप्रकारकज्ञाननियता
नुमितिशाब्दबोधसामग्रीकाले रक्तत्वव्याप्यादिविशिष्टद्रव्यत्वावच्छिन्नविशेषण
कप्रत्यक्षवारणाय तत्र तादृशसामग्रीणां प्रतिबंधकतायां सर्वैरेव कल्पनीयत
यातत्रैव प्रतिबध्यतावच्छेदके रक्तत्वव्याप्यादिधर्मितावच्छेदकधर्मानिवेशप्रसामा राम

न्यतः प्रतिबध्यप्रतिबंधकभावेनैवोपपत्तेः ॥ रक्तदंडवान्वह्निव्याप्यधूमवानित्यादि
ध्विकप प्रत्यक्षे तादृशसामग्रीप्रतिबंधकताकल्पनमस्माकमपि न ॥ नच रक्तत्वविशिष्टद्र
व्यत्वावच्छिन्नप्रकारताकप्रत्यक्षं जायतामित्येतादृशेच्छाकाले ऽतस्यां तादृशप्र
त्यक्षसामग्र्यामुक्तसामग्रीकाले रक्तदंडवानित्यादिप्रत्यक्षवारणायेच्छाविशेषा
न्विशिष्टोत्तेजकीकृत्यद्रव्यत्वदंडत्वादिरूपधर्मितावच्छेदकभेदेन भिन्नानंतप्रति
बंधकताकल्पनमावश्यकमिति वाच्यं ॥ उक्तसामग्रीविशिष्टस्वीयप्रत्यक्षनिष्ठवि
शेष्यतानिरूपितायारक्तत्वप्रकारतानिरूपितत्वावच्छिन्नप्रकारत्वनिष्ठप्रकारतानि त
रूपितावच्छिन्नत्वनिष्ठावच्छेदकतावच्छेदकत्वरूपद्रव्यत्वादिनिष्ठसंबंधावच्छिन्न
प्रतियोगिताकेच्छाभावस्य रक्तत्वधर्मितावच्छेदकधर्मनिष्ठप्रत्यासत्त्या रक्तत्ववि

शिष्टप्रकारकबोधंप्रतितादृशधर्मान्वितशिष्यानिवेशेयेवप्रतिबंधकताकल्पना
त्॥यत्तु॥मास्तुविशेष्येविशेषणमितिरीत्याबोधंप्रतिसंशयःप्रतिबंधकः॥तथा
पिरक्तदंडवानितिबोधंप्रतिदंडत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वाद्यभा
वप्रकारताशालिज्ञानत्वेनदंडेरक्तोनवेतिसंशयस्यप्रतिबंधकताकल्प्यते॥
तादृशरक्तत्वाभावप्रकारताभिन्नत्वतथाविधरक्तत्वप्रकारताशालिज्ञानत्वरूप
निर्णयत्वेनहेतुत्वेतादृशप्रकारताभिन्नत्वतादृशप्रकारताशालित्वज्ञानत्वानां
त्रयाणांविशेषणविशेष्यभावविनिगमनाविरहेणबहुकारणताकल्पनापत्तेः॥
अस्मन्मतेरक्तत्वाभावप्रकारताशालित्वज्ञानत्वयोर्विशेष्यविशेषणभावेवि
निगमनाविरहेणसंशयाभावस्यकारणताद्वयं।रक्तत्वप्रकारताशालित्वज्ञान राम

त्वयोक्तयात्वविनिगमनाविरहेणदंडोरक्त इत्येतादृशज्ञानस्यकारणतावछ्रयमि
तिचतुष्टयमात्रकल्पनात् ॥ अथरक्तत्वाभावप्रकारकज्ञानस्यात्मनिष्ठप्रत्यासत्त्या
प्रतिबंधकत्वेकार्यव्यक्तिस्थलेएकस्मिन्नेवात्मनिशरीरांतरावछेदेनदंडोरक्तो
नवेतिसंशयस्यत्वेशरीरांतरावछेदेनरक्तदंडवानितिबोधात्सत्त्वाव्यभिचारइ
ति ॥ तत्तच्छरीरनिष्ठप्रत्यासत्त्यातयात्वेपरपुरप्रवेशस्थले तैच्छरीरावछे त
देनाभिभाव्यस्यसंशयसंबंधेऽपितदवछेदेनाभिभावकस्यात्मनिविशिष्टवैशि
ष्ट्यबोधोत्पत्त्याव्यभिचारइतितत्तच्छरीरावछिन्नत्वेनिवेशयात्मनिष्ठप्रत्यासत्त्या
तस्यप्रतिबंधकतावाच्येति ॥ अनंतशरीरभेदेनप्रतिबंधकताभेदाद्गौरवं ॥ मन्त्र
तेसमवायावछेदकत्वघटितसामानाधिकरण्याभयसंबंधेनरक्तत्वप्रकारकज्ञा

ग०वि०वै०

३१

नहेतुतायांतदप्रकारतासन्यत्वनिवेशादिति निगमनाविरहेणतस्यकत्तिपयप्रका
रेणतादृशहेतुताभावस्यानपायात् ॥ विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां
शरीरविशेषावच्छिन्नत्वानिवेशेपत्रकायव्यूहात्मन्येकत्रशरीरावच्छेदेनतादृ
शज्ञानसत्वेतदीयान्यशरीरावच्छेदेनाऽनुभावकांतरेतादृशज्ञानसत्वेच्चतादृ
शरीरावच्छेदेनतदात्मनि विशिष्टवैशिष्ट्यापत्तेःप्रागुक्तदिशावारणासंभवेनतत्त
अस्तु त्तदानिवेशादितिचेन्न ॥ संशयप्रतिबंधकतायांशरीरविशेषावच्छिन्नत्वानि
वेशात्तदवच्छेदेनभेदः ॥ तथाऽप्येतन्मतेऽपेक्षयासंशयभेदस्यकारणतावच्छेद
कत्वमतेरक्तदंडवान्रक्तदंडवत्पुरुषवान्रक्तदंडिमद्भूतलमित्यादावनंतवि
धविशिष्टवैशिष्ट्यबोधहेतुतावच्छेदककोटौरक्तत्वाद्यभावप्रकारकैकविध राम

संशयभेदस्य निवेशनीयतया भवन्मते गौरवं ॥ रक्तदंडवत्पुरुष इत्यादिबोधजनक
तायां तदनिवेशे रक्तत्वांशे संशयात्मकदंडांशे निर्णयात्मकरक्तत्वविशिष्टदंडादि रक्त
प्रकारकज्ञानात्तथाविधविशिष्टवैशिष्ट्यबोधोत्पत्त्यापत्तेः ॥ विशेषणतावच्छेदकता
वच्छेदकांशे निर्णयात्मकादेवावच्छिन्नविशेषणतावच्छेदकताकविशिष्टवैशिष्ट्य
षा बोधोत्पत्त्या तत्रैवापत्तेरयोगात् ॥ अत एवानुमितिजनकतायां इव वह्निव्याप्यधूम
वान्पर्वत इत्यादि विशिष्टवैशिष्ट्य[illegible]बोधजनकतायामपि व्याप्यत्वांशे निश्च
ति यत्वनिवेशनं तत्रानुमितिलक्षणे [illegible]व्याप्तिरांशे कृता दीधितिकृता ॥ रक्तत्वप्रका
रकनिर्णयजन्यतावच्छेदकीभूतं तं रक्तदंडवानित्यपि तादृशबोधनिष्ठं रक्तत्ववि
शिष्टवैशिष्ट्यावगाहित्वस्य रक्तदंडवत्पुरुषवानित्यादिबोधव्यापकत्वेऽपि यत्र

रक्तत्वांशे संशयात्मकरक्तारक्तदंडवान्पुरुष इत्यादिज्ञानोत्तरं रक्तो दंड इति स्म
रणात्मकनिश्चयस्तदुत्तरं तथाविधबोधापत्तेः॥ अस्मन्मते तथाविधसकलबो
धसाधारणरक्तत्वविशिष्टदंडवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं प्रति तथाविधसं
शयस्यैकप्रतिबध्यप्रतिबंधकभावेनैवोपपत्तेरिति रक्तदंडवत्पुरुषवानित्यादि
बोधे रक्तत्वविशिष्टदंडवैशिष्ट्यावगाहिज्ञानत्वेनैव हेतुता॥ रक्तत्वाद्यंशे संशया
न त्मकज्ञानस्यैव रक्तत्वविशिष्टदंडादिवैशिष्ट्यावगाहित्वाभ्युपगमेन तदंशे निश्चयत्व
निवेशानैकस्यापीति न सत्॥ संशयस्याप्रतिबंधकतामते दंडो रक्त इति निर्णया
नंतरमिघाबाल्लाद्दंडे रक्तत्वाभावावगाहिनो रक्तत्वाद्यंशे संशयात्मकदंड
ज्ञानस्य रक्तत्वविशिष्टदंडवैशिष्ट्यावगाहित्वे बाधकाभावात्॥ वस्तुतस्तु॥ राम

कार्य्यव्यक्तस्थले एकस्मिन्नात्मन्यैकशरीरावछेदेन संशयस्त्वेच्छरीरांतरा
छे वैदेनैवोसत्तावपिप्रमाणाभावात् ।। शरीरविशेषावछिन्नत्वमनंतर्भाव्यैवात्म
निष्ठप्रत्यासत्त्या संशयस्य प्रतिबंधकं संकल्पनीयमिति न संशयस्य प्रति
बंधकतामतेऽउक्तगौरवावकाश इति ।। ● तदपि न युक्तं विशिष्टवैशिष्ट्यबोधं प्र
ति संशयस्य प्रतिबंधकत्वे भिन्नविषयकानुमित्यादिकं प्रति विशिष्टवैशिष्ट्य
बोधात्मकप्रत्यक्षेऽका विशिष्टत्वादृशप्रत्यक्षसामग्र्याः प्रतिबंधकतायां विशेष
णतावछेदकाभावप्रकारकज्ञानाभावस्य निवेशनीयतया तस्य कारणांतरे
ऽपि ● छयाच्चसमं विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबंधकताबाहु
ल्यप्रसंगात् ।। निश्चयत्वावछिन्नस्य सामग्री प्रतिबंधकतायां निवेशो संशया.
१× निश्चयत्वेन हेतुतामते तत्प्रकारकज्ञाने विषयतापानिविष्टस्य तदभावाप्रकारकत्वस्यान्यत्र विशेषणतयानिवेश

सिमताद् ।। मे प्रायप्रतिबंधकतामतो ×१

गवदि०रे०

नंतरं निश्चयद्वितीयक्षणे तन्मते सिद्धानुमित्यादेरनुपपत्तिः ॥ न च संशय
३३ निश्चययोस्तानां युगपदवस्थानासंभवेन संशयदशायामिच्छाविशिष्टविशेष
णतावच्छेदकप्रकारकनिश्चयसमवधानमेव न संभवतीति नेयमनुपपत्तिः ॥
अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमते ऽपेक्षाबुद्धिद्वितीयक्षणे समानाधिकरण
विशेषगुणानुत्पत्तेः संशयस्यापेक्षाबुद्धित्वे ऽपि त्रयाणां युगपदवस्थानस्य दुरु
पपादत्वात् [redacted] ऽइति वाच्यं ॥ ज्ञानेच्छयोर्युगपदव
स्थानस्य नवीनैरुपगमान्निर्णयेच्छयोर्युगपदुत्पादस्थले एव तादृशानुपप
त्तिसत्वात् ॥ एवं च संशयप्रतिबंधकतामते दंडत्वासामानाधिकरण्येन रक्त
त्वावगाहिनि विशिष्टवैशिष्ट्यबोधे दंडत्वसामानाधिकरण्येन रक्तत्वाभाव राम
३३

वगाहिज्ञानत्वेनप्रतिबंधकत्वेदंडत्वसामानाधिकरण्यमात्रेणकेनादिद्वयावगाहि
निश्चयात्ताहृशविशिष्टवैशिष्ट्यबोधानुपपत्तिः॥दंडत्वावच्छेदेनतदवगाहिज्ञा
त्व नत्वेनप्रतिबंधकत्वेदंडसामानाधिकरण्येनतदभावेतदवच्छेदेनरक्तत्वमवगा
हमानास्यसंशयादपितथाविधविशिष्टवैशिष्ट्यबोधापत्तिः॥रक्तत्वांशेदंड
त्वसामानाधिकरण्यमात्रावगाहिविशिष्टवैशिष्ट्यबोधेताहृशज्ञानत्वेन
हेतुत्वेफलीभूतज्ञानेदंडत्वावच्छेदेनरक्तत्वभानप्रतिबंधकसमवहितदंडत्वा
वच्छेदेनरक्तत्वनिश्चयाद्रक्तत्वेदंडत्वसामानाधिकरण्यमात्रावगाहिविशि
ष्टवैशिष्ट्यबोधानुपपत्त्यातत्कल्पेचताहृशापपत्तिवारणासंभवात्॥अ
स्मन्मतेचस्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूत

ता

३४ प्रकारताश्रन्यत्वविशिष्टस्वनिरूपकत्वसंबंधेनरक्तत्वप्रकारकज्ञानत्वरू
पनिश्चयत्वस्यदर्शितनिश्चयसाधारणस्यदर्शितसंशयव्यावृत्तस्यज
नकतावच्छेदकत्वोपगमान्नानुपपत्तिलेशोपीत्यपिवदंति॥अत्रचानुद्बु
द्धसंस्कारादिविशिष्टवैशिष्ट्यावगाह्यनुभववारणायकारणतावच्छेदककौ
टौज्ञानत्वनिवेशः॥तथाचस्वसत्त्वतराविशेषणतावच्छेदकस्मरणत्वपुग मु
ष्यैवविशिष्टवैशिष्ट्यावगाहिसंस्कारादिविशिष्टवैशिष्ट्यस्मरणात्मकताहेतुबो
धःस्वीकरणीयः॥विशिष्टविषयेोपहितकृतिसाक्षात्कारात्सर्वंनियमतोविशिष्ट
व्या विषयकस्मरणंकल्पनीयं॥संस्कारत्वंतत्तत्सविषयकवृत्तिजातिविशेषएव
कारणतावच्छेदकतयोपगंतव्यः॥तथाचकार्यतावच्छेदकेऽपिज्ञानत्वंननि राम

वेशानीयं ॥ विशिष्टप्रकारकस्मृतौ च विशेष्ये विशेषणमिति रीत्या विषयत्वस्वी
करणीयं । ईश्वरज्ञाने ऽपि तद्विषयत्वं ॥ ननु विशिष्टवैशिष्ट्यावगाहिबोधीय
ताहशविलक्षणमपीति न नित्यज्ञानसाधारण्यं जन्यतावच्छेदकस्य ॥ आस्तां
वाजन्यप्रत्यक्षवृत्तिजातिविशेषएवतथा ॥ यद्दिचयादृशणदेवाप्रसिद्धसाध्य
कपरामर्शाद्विशिष्टवैशिष्ट्यावगाह्यनुमितिः स्वतंत्रविशेषणतावच्छेदकप्र
कारकज्ञानदृशायामुत्पद्यते तादृशादेव परामर्शाद्विशेषणतावच्छेदकप्रकार
कज्ञानासत्वे केवलं विशेष्ये विशेषणमिति रीत्या साध्यविशेषणकायाः साध्य
ऋ विशेष्यिकाया अनुमितेरुत्पत्त्या ऽतिप्रसंग इति विभाव्यते ॥ तदा ऽनुमितित्वाव
च्छिन्नं प्रति तस्य हेतुत्वांतरमास्तां ॥ शाब्दबोधस्थले च पदजन्यस्मरणशा

द्बोधात्मकविशेषणतावच्छेदकप्रकारकज्ञानाद्धाद्धविशिष्टवैशिष्ट्यबोधानुत्पा
देन तत्र तत्र बोधस्य पृथक्कारणताया आवश्यकत्वात्तत एवोपपत्तिः ॥ अस्तु वा
कालिकविशेषणतादैशिकविशेषणतोभयसंबन्धेन प्रत्यक्षानुमित्यादिसाधा
रणं किंचिद्विशेषितविशिष्टवैशिष्ट्यावगाहित्वमेव जन्यतावच्छेदकमिति दिक् ॥
अथ निर्विकल्पकानंतरं विशिष्टवैशिष्ट्यकान्तद्विशिष्टवैशिष्ट्यबोधः कदाचि
दुपलक्षितबोध इत्यत्रासंसर्ग[illegible]य एव नियामकः ॥ तद्विशिष्टाभावाद्यग्रह
दशायां तत्प्रकारकज्ञानसत्त्व इव निर्विकल्पकोत्तरविशिष्टप्रतियोगिकत्वं संसर्गांशेनावगाहते न तु संसर्गानवगाहते योबोधः स तदुपलक्षितोऽपि नियमतस्तद्विशिष्टवैशिष्ट्यबोधः ॥ वस्तुतो यत्र विशिष्टवैशिष्ट्यं बोध्यते तत्ता[illegible]विष कादराम
तद्विशिष्टवैशिष्ट्यबोधोपगमे क्षतिविरहाद्विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानं हेतुत्वंनि
र्युक्तिकं कदाचि[illegible]

यबाधस्थले तज्ज्ञाने तत्तद्दोषाणां नियामकतया कदाचित्तदुपस्थितं वैशिष्ट्यबो
धोऽप्युपपद्यते ॥ तद्धर्मप्रकारकज्ञानकालेऽपि तादृशस्थले विशिष्टवैशिष्ट्यबो
धस्य कदाचिदेवोत्पत्त्या तद्दोषस्य तन्नियामकतया भवतोऽप्यावश्यकत्वात् इति
चेन्न ॥ विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानस्याहेतुत्वे घ
टत्वादिनिर्विकल्पकानंतरं घटो नास्तीत्यभावप्रत्यक्षवारणायाभावबुद्धौ प्रति
स्य योगितावच्छेदकप्रकारकज्ञानहेतुतायाः कल्पनीयतया गौरवात् तन्मते पुनस्ता
दृशाभावबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र विशेषणतावच्छे
दकप्रकारकज्ञानमुद्रया घटत्वादिप्रकारकज्ञानहेतुतयोक्तापत्त्यसंभवेन
प्रतियोगितावच्छेदकप्रकारकज्ञानस्य स्वतंत्र विशेषणतावच्छेदकोहेतुत्वाकल्पनात् ॥
त्व

 विशिष्टानुयोगिकत्वाख्यवैशिष्ट्यावगाहिन्यामभावबुद्धौ घटत्वादिप्रकारकज्ञानस्य हेतुत्वमस्ति ॥ २

३९ नन्वा०नुयोगित्वसंयोगादिसाधारणवैशिष्ट्यत्वस्यैकस्य दुर्वारत्वात् । वैशिष्ट्या
नां विशिष्ट्यापादियतयो विशिष्टनिरूपितसंयोगाद्यवगाहिबुद्धौ तत्तद्धेतुत्वं निर्यु
क्तिकमिति वाच्यं ॥ विशिष्टप्रतियोगिकत्वावच्छिन्नसंसर्गताकत्वस्य विशेषणतावच्छि
न्नप्रकारकत्वादेर्वाऽनुगतस्य विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेद
कतायाः प्रागुक्तत्वाद्वैशिष्ट्यभेदेन कारणताभेदाभावाद्घटवद्भूतलमित्यादि वि
शिष्टवैशिष्ट्यबोधे घटत्वादिप्रकारकज्ञानस्य हेतुत्वे तादृशेच्छाविशिष्टप्रत्यक्ष
सामग्र्यां भिन्नविषयकानुमितिं प्रति प्रतिबंधकतायां तादृशकारणस्याधिक
स्य निवेशनीयतया गौरवमिति तु नाशंकनीयं ॥ भवन्मतेऽपि तत्र विशेषणज्ञा
नस्य निवेशनसाम्यात् ॥ रक्तदंडत्वादिप्रकारकज्ञानदशायां रक्तो दंडो नास्ती राम

१ विशकलित १ ३९

त्य[redacted]भावप्रयुक्तस्वारणायांदंडत्वादिधर्मितावच्छेदकरक्तत्वादिप्रकारक
ज्ञानस्यस्वतंत्रहेतुत्वाकल्पनप्रयुक्तलाघवानुरोधेन विशेषणतावच्छेदकांशे
स धर्मितावच्छेदकक विशिष्टवैशिष्ट्यबोधे तद्धर्म धर्मितावच्छेदकक विशेषण
तावच्छेदकज्ञानस्य हेतुतासिद्धिरपि द्रष्टव्या॥ एवं तादृशहेतुत्वाकल्पनेन इच्छावि
शिष्टरक्तदंडवान्नित्युपनीतभानसामग्र्यां अनुमित्यादि[redacted]प्रतिबंधकतायां उपना
यकज्ञानविषयाहेतुभूतानां रक्तत्वदंडत्वादिविषयक[redacted]ज्ञानानां रक्तत्वज्ञान
त्वदंडत्वज्ञानत्वरूपविभिन्नरूपेण निवेशनीयतया तेषां मिथो विशेषणविशेष्य
भावेकारणांतरेणासममनेकेषां तथात्वे विनिगमनाविरहेण गौरवं॥ अस्माकं
च तथाविधनानाज्ञाननिवेशस्थले दंडत्वादिधर्मितावच्छेदकरक्तत्वादिभाने
विशेष्यकारकएकज्ञानस्य निवेशनीयतया लाघवमित्यपि बोध्यं॥ विशिष्टमति

यौगिकवैशिष्ट्यबोधेविशेषणतावच्छेदकप्रकारकज्ञानवद्विशिष्टानुयोगिक
वैशिष्ट्यबोधेऽप्यनुयोगितावच्छेदकप्रकारकज्ञानं हेतुः॥तद्धर्मविषयकनि
र्विकल्पकानंतरं तद्विशिष्टे[redacted]विशेषणवैशिष्ट्यावगाहिज्ञानानुदयात्त.
योस्तद्धर्मानुयोगिताकत्वावच्छिन्नसंसर्गता निरूपकतद्धर्मावच्छिन्नविशेष्यता
शालिबुद्धित्वतद्धर्मप्रकारकज्ञानत्वाभ्यांकार्यकारणभावः॥केवलमेकत्रद्वयमि
तिरीत्यादंडत्वावगाहिन्यांविशेषणावगाहिबुद्धौचवैशिष्ट्यांशेविशिष्टएवतत्का
र्यतावच्छेद[redacted]कावच्छिन्नानुयोगिकत्वेंभासतेनऽतो न
नव्यभिचारः॥यत्तु॥एकत्रद्वयमितिरीत्याबोधेएकविशेषणस्यापरविशे
षणावगाहिबुद्धौचवैशिष्ट्यांशेविशिष्टएवतत्कार्यतावच्छेदकेनिरूपकांतंन राम
देयमिति॥तन्नसम्यक्॥गंधप्रागभावोपलक्षितधर्मिणिगंधानुमिते ३८

विशिष्टवैशिष्ट्यावगाहित्वया निर्धर्मितावच्छेदकत्वापातात् ॥ यदि च [illegible] तत्प्रकार
कज्ञानं विना विशिष्टानुयोगिकवैशिष्ट्यविषयकोऽपि तद्धर्म[illegible]धर्मिताव
च्छेदकबोधेन स्वीक्रियते किंतु तुल्यकक्षा न यविशेषणकबोध एव तदा तद्ध
र्मावच्छिन्नविशेष्यताकबुद्धित्वमात्रं संसर्गतावच्छेदकप्रकारकज्ञानस्य विशि
ष्टसंसर्गकबुद्धिरेवं नियमतः स्वीकारे संसर्गताया विषयतास्वीकारे विशि
ष्टविशेषणकज्ञानसाधारणधर्मावच्छिन्नविषयताकबुद्धित्वमात्रं जन्यता
वच्छेदकं वाच्यं ॥ अनुयोगितावच्छेदकांशे सधर्मितावच्छेदककदंडी चैत्रः
कुंडली स्यां[illegible]दि बोधे च चैत्रत्वादिधर्मितावच्छेदककदंडादिप्रकारकज्ञानं हे
नहेतुता एवं क्रिया बोध्या ॥ अत्र निरुक्तयत्ननिवेशानमपि पूर्ववत् ॥ एवं [illegible] । अ

धिकरणतावच्छेदकनिर्विकल्पकानंतरमभाववुद्धेर्वारणायाधिकरणतावच्छेद
कप्रकारकज्ञानस्य स्वतंत्रहेतुत्वाकल्पनप्रयुक्तलाघवेनानुयोगितावच्छेदक
प्रकारकज्ञानस्य विशिष्टबोधे हेतुतासिद्धिः भूतलं घटवदित्यादिबुद्धेर्भूतलत्व
त्वावच्छिन्नानुयोगिताकविशिष्टवैशिष्ट्यावगाहितया तत्रानुयोगितावच्छेदकप्र
कारकज्ञानमुद्देश्यै वास्मन्मते भूतलत्वप्रकारकज्ञानस्यापेक्षितत्वात्॥ विशि
ष्टप्रतियोगिकवैशिष्ट्यविशिष्टानुयोगिकवैशिष्ट्योभयबोधसाधारणतद्धर्मा
वच्छिन्नविषयताकबुद्धित्वतत्प्रकारकज्ञानजन्यतावच्छेदकत्वसंभवे विशेषण
नुयोगिता तावच्छेदकप्रकारकज्ञानहेतुतयोरैक्यादेकयुक्त्यैवोभयहेतुतासिद्धिरित्या
लोचनीयम्॥ ॥इति श्रीमहामहोपाध्यायश्रीगदाधरभट्टाचार्यचक्र राम
वर्तिरचिता विशिष्टवैशिष्ट्यविचारः समाप्तः॥ ॥छ॥छ॥ छ ॥छ॥ ३८
स्वामिदीक्षीत